# sAMkhyasaptatiTIkA jayama NgalA

# સાઙ્ખ્યસપ્તતિટીકા જયમઙ્ગલા

## Document Information

Text title : jayamangala

File name : jayamangala.itx

Category : major_works, mangala

Location : doc_z_misc_major_works

Transliterated by : Dhaval Patel drdhaval2785 at gmail.com

Proofread by : Dhaval Patel drdhaval2785 at gmail.com

Latest update : September 15, 2014

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# sAMkhyasaptatiTIkA jayama NgalA

# સાઙ્ખ્યસપ્તતિટીકા જયમઙ્ગલા

કારિકા ૧

અધિગતતત્ત્વાલોકં લોકોત્તરવાદિનં પ્રણમ્ય મુનિમ્ ।
ક્રિયતે સપ્તતિકાયાષ્ટીકા જયમઙ્ગલા નામ ॥

પ્રેક્ષાવન્તોઽનુક્તે પ્રયોજને ન ક્વચિત્પ્રવર્તન્ત ઇતિ પ્રયોજનમુચ્યતે
તત્ત્વજ્ઞાનાન્મોક્ષઃ તત્ત્વાનિ પઞ્ચવિંશતિઃ । તથા ચોક્તમ્ -
પઞ્ચવિંશતિતત્ત્વજ્ઞો યત્ર કુત્રાશ્રમે રતઃ ।
જટી મુણ્ડી શિખી વાપિ મુચ્યતે નાત્ર સંશયઃ ॥ ઇતિ ॥

તેષુ ચ ષષ્ટિતન્ત્રાદિખ્યાતેષ્વિતિ । વિસ્તરત્વાત્ ષષ્ટિતન્ત્રસ્ય
સંક્ષિપ્તરુચિસત્ત્વાનુગ્રહાર્થં સપ્તતિકારમ્ભઃ । વક્ષ્યતિ ચ
'એતદાર્યાભિઃ સંક્ષિપ્તમ્' ઇતિ । મોક્ષેણ કિં ફલમિતિ ચેદ્દુઃખનિવૃત્તિઃ ।
અતત્ત્વજ્ઞો દુઃખૈરભિહન્યમાનસ્સંસરન્નાસ્તે । તત્ત્વજ્ઞાનાત્તુ
કૈવલ્યમાપ્નોતિ, ન દુઃખૈરભિહન્યતે । હન્યમાનેન કો હેતુર્જિજ્ઞાસિતવ્ય
ઇત્યત્રાહ-

॥ દુઃખત્રયાભિઘાતાજ્જિજ્ઞાસા તદવઘાતકે હેતૌ ।
દૃષ્ટે સાપાર્થા ચેન્નૈકાન્તાત્યન્તતોઽભાવાત્ ॥ ૧ ॥ ॥

'દુઃખત્રયાભિઘાતાજ્જિજ્ઞાસા' ઇત્યાદિ । દુઃખાનાં ત્રયં દુઃખત્રયમ્ ।
આધ્યાત્મિકમ્, આધિભૌતિકમ્, આધિદૈવિકં ચેતિ । આત્મન્યધ્યાત્મમ્,
તત્ર યદ્ભવતિ તદાધ્યાત્મિકમ્ । શારીરં માનસં ચેતિ । તત્ર
વાતપિત્તશ્લેષ્માણાં વૈષમ્યેણ જ્વરાદિદુઃખમ્, તચ્છરીરે ભવતીતિ
શારીરમ્ । યત્કામક્રોધશોકાદિભિઃ મનસિ દુઃખં તન્માનસમ્ ।
યન્માનુષપશુમૃગપક્ષિસરીસૃપસ્થાવરાન્યધિકૃત્ય ભવતિ
તદાધિભૌતિકમ્ । યચ્છરીરે ગ્રહાવેશાદીનિ દૈવાન્યધિકૃત્ય ભવતિ
તદાધિદૈવિકમિતિ । એતદ્દુઃખત્રયમ્ । તેનાભિઘાતાત્પીડનાદ્ધેતોર્જિજ્ઞાસા
જ્ઞાતુમિચ્છા ભવતિ ॥

કસ્મિન્ વિષય ઇત્યાહ- 'તદવઘાતકે હેતૌ' ઇતિ । અવઘાતયત્યપનયતીત્યવઘાતકઃ । તસ્ય દુઃખત્રયસ્યાવઘાતકસ્તદવઘાતકઃ । તૃજકાભ્યાં ષષ્ઠીસમાસપ્રતિષેધઃ, 'તત્પ્રયોજકો હેતુશ્ચ' ઇતિ ન ભવતિ । કેન ખલ્વિમાનિ દુઃખાન્યુત્પદ્યન્ત ઇતિ તદવઘાતકો હેતુર્જિજ્ઞાસ્યો ભવતિ । દુઃખવાનહમેતત્પ્રતીકારમન્વેષયામીતિ પ્રાયોવાદઃ । સ ચ પઞ્ચવિંશતિતત્ત્વજ્ઞાનાન્નાન્ય ઇતિ મનસિ વર્તતે ॥

'દૃષ્ટે સાઽપાર્થા ચેત્' ઇતિ । સ્યાદેતત્ યદિ દૃષ્ટસ્તદવઘાતકો હેતુર્ન સ્યાત્ । યાવદાધ્યાત્મિકસ્ય શારીરદુઃખસ્યાપનયને ચિકિત્સાશાસ્ત્રવિહિત એવોપાયોઽસ્તિ, માનસસ્યાપિ સંખ્યાનબલં રમ્યાશ્ચ શબ્દાદયો વિષયાઃ । આધિભૌતિકાધિદૈવિકયોરપિ, અવઘાતહેતુરનુષ્ઠીયમાનો લોક એવ દૃશ્યતે, તયોઃ સત્પ્રતિપક્ષત્વાત્ । તત્રાધિદૈવિકસ્ય સામદામભેદદણ્ડોપાયઘટિતારમ્ભાઃ । આધિભૌતિકસ્યાપિ નિપાતપ્રતિપાતસંવૃતપ્રદેશાશ્રયણાદયઃ ॥

તતશ્ચ દૃષ્ટે હેતૌ સતિ જિજ્ઞાસાઽસ્મિન્ વિષયે નિરર્થકેત્યાશઙ્ક્યાહ- 'નૈકાન્તાત્યન્તતોઽભાવાત્' ઇતિ । નાઽપાર્થા, સાર્થિકૈવ । કુતઃ- એકાન્તતઃ એકાન્તાત્યન્તતોઽભાવાદપિ । એકાન્તેનાત્યન્તેન ચ દુઃખાભાવસ્યાભાવાદિત્યર્થઃ । દૃષ્ટે હ્યુપાયે ક્રિયમાણેઽપિ કેષાંચિદ્દુઃખત્રયં ભવત્યેવેતિ નૈકાન્તેનોપશમઃ । કથંચિદુપશમે પુનરુત્પાદનાત્ નાત્યન્તેનોપશમઃ । તસ્માદૈકાન્તિકાત્યન્તિકદુઃખોપશમાય જિજ્ઞાસા યુક્તેતિ ॥ ૧॥

કારિકા ૨

યદ્યેવમૈકાન્તિકાત્યન્તિકદુઃખોપશમહેતુર્વેદવિહિતોઽસ્તિ । તથા ચાહ-
અણમ સોમમમૃતા અભૂમાગન્મ જ્યોતિરવિદામ દેવાન્ ।
કિમસ્માન્ કૃણવદરાતિઃ કિમુ ધૂર્ત્તિરમૃતમર્ત્યસ્ય ॥ ઇતિ ॥

અસ્યાયમર્થઃ- ઇન્દ્રો દેવનામપણ્ડિતાનાહ 'દિવ્યાઃ કિમન્યત્સુખમસ્તિ' ઇતિ । તે તમાહુઃ 'નાસ્તિ' ઇતિ । સોમમપામ, સોમં પીતવન્તો વયમ્ । તતોઽમૃતા અભૂમ, વ્યપગતમૃત્યવો જાતાઃ । 'અગન્મ જ્યોતિઃ' ઇતિ । જ્યોતિઃ સ્વર્ગોઽયમ્, તં પ્રાપ્તા વયમ્ । 'અવિદામ દેવાન્' ઇતિ । ઇયન્તો દેવા અસ્મિન્ સ્વર્ગ ઇતિ જ્ઞાતવન્તઃ જ્ઞાનમસ્માકમુત્પન્નમિત્યર્થઃ । 'કિમસ્માન્ કૃણવત્' ઇતિ ।

કૃણવન્મૃત્યુરુચ્યતે । અસ્માન્ સોમપાનાન્ કિં મૃત્યુઃ કરિષ્યતે । અરાતિઃ વ્યાધિઃ સોઽપિ, ધૂરતિર્જરા સાપિ ચાસ્માકં કિં કરિષ્યતિ । 'અમૃતમર્ત્યસ્ય' ઇતિ । તસ્માત્ સોમપાનાદ્દુઃખોપશમહેતુરસ્તીત્યસ્મિન્ પૂર્વપક્ષે -

॥ દૃષ્ટવદાનુશ્રવિકઃ સ હ્યવિશુદ્ધિક્ષયાતિશયયુક્તઃ
તદ્વિપરીતઃ શ્રેયાન્ વ્યક્તાવ્યક્તજ્ઞવિજ્ઞાનાત્ ॥ ૨ ॥ ॥

'દૃષ્ટવદાનુશ્રવિકઃ' ઇત્યાદિ । અનુશ્રૂયતે પારમ્પર્યેણેત્યનુશ્રવો વેદઃ શ્રુવઃ 'ઋદોરપ્' । તત્ર ભવો હેતુરાનુશ્રવિકઃ । અધ્યાત્માદિઃ । દૃષ્ટેન તુલ્યો દૃષ્ટવત્ । તસ્યાપિ દોષદર્શનાત્ ॥

યદાહ - 'સ હ્યવિશુદ્ધિક્ષયાતિશયયુક્તઃ' ઇતિ । યસ્માદાનુશ્રવિકો હેતુરવિશુદ્ધ્યાદિભિસ્ત્રિભિર્દોષૈર્યુક્તઃ । તત્રાગ્નિહોત્રાદૌ પશુવ્યાપાદનાત્ સોમપાનાદવિશુદ્ધિયુક્તઃ । કર્મક્ષયાત્ સ્વર્ગચ્યુતિરિતિ ક્ષયયુક્તઃ । તથા ચાહુઃ - 'બહૂનીન્દ્રસહસ્રાણિ વ્યતીતાનિ યુગે યુગે' ઇતિ । 'સ હિ દેવેષ્વપિ દેવો દરિદ્રાતિ' ઇતિ । 'ઈશ્વરં દૃષ્ટ્વા મહદ્ દુઃખમુત્પદ્યતે' ઇત્યતિશયયુક્તઃ । તથાહિ- યઃ ક્રતુશતેન યજતે તસ્ય મહદૈશ્વર્યમ્, યો દ્વાભ્યાં ત્રિભિર્વા તસ્યાલ્પમિતિ । તસ્માદાનુશ્રવિકોઽપિ દૃષ્ટવત્પરિત્યાજ્યઃ ॥

કસ્તર્હિ શ્રેયાનિત્યાહ- 'તદ્વિપરીતઃ શ્રેયાન્' ઇતિ । દૃષ્ટાનુશ્રવિકદ્વારા યો વિપરીતઃ તત્ત્વજ્ઞાનાખ્યઃ સ શ્રેયાન્ । તસ્ય અકૈવલ્યપ્રાપકત્વાત્ । તત્રૈકાન્તાત્યન્તતોઽભાવાદ્દૃષ્ટાચ્છ્રેયાન્ । શરીરહાનાદ્ધિ શુદ્ધફલઃ, પ્રકૃતિહાનાદક્ષયફલઃ, અનુત્તરત્વાચ્ચ નિરતિશયફલ ઇત્યાનુશ્રવિકાચ્છ્રેયાન્ ॥

સ કથં પ્રોચ્યત ઇત્યત્રાહ 'વ્યક્તાવ્યક્તજ્ઞવિજ્ઞાનાત્' ઇતિ । રાશિત્રયેણ પઞ્ચવિંશતિતત્ત્વાનિ કથ્યન્તે । તત્ર મહદાદિભૂતપર્યન્તં ત્રયોવિંશતિપ્રકારં વ્યક્તમુચ્યતે, તેન રૂપેણ પ્રધાનસ્ય વ્યક્તત્વાત્ । અવ્યક્તં પ્રધાનમ્, કેનચિદ્રૂપેણાવ્યક્તત્વાત્ । જાનાતીતિ જ્ઞઃ પુરુષઃ । તેષુ યદ્વિજ્ઞાનં સ્વરૂપપરિચ્છેદઃ, તસ્માત્ પ્રાપ્યત ઇત્યર્થઃ । તન્વાદિ હિ પરિચ્છિદ્ય તદભ્યાસાદુત્તરકાલં પ્રકૃતિપુરુષાન્તરજ્ઞાનમુત્પદ્યતે, તતશ્ચ કૈવલ્યમિતિ । અસ્યા આર્યાયા વક્ષ્યમાણા યાઃ, સર્વા એવાર્થેન ભાષ્યસ્થાનીયા દ્રષ્ટવ્યાઃ ॥ ૨॥

કારિકા ૩

તત્રૈષાં વ્યક્તાદીનામુત્પાદાભ્યાં સ્વરૂપમાહ-
॥ મૂલપ્રકૃતિરવિકૃતિર્મહદાદ્યાઃ પ્રકૃતિવિકૃતયઃ સપ્ત ।
ષોડશકસ્તુ વિકારો, ન પ્રકૃતિર્ન વિકૃતિઃ પુરુષઃ ॥ ૩ ॥

'મૂલપ્રકૃતિઃ' ઇત્યાદિ । પ્રકૃતિઃ પ્રધાનમ્ । પ્રક્રિયત ઉત્પદ્યતે પ્રધાનાત્ અસ્યા ઇતિ પ્રકૃતિઃ । મૂલં ચ તત્પ્રકૃતિશ્ચેતિ મૂલપ્રકૃતિઃ । સપ્તાનાં પ્રકૃતીનાં મૂલમાદ્યં કારણમિત્યર્થઃ ॥

'અવિકૃતિઃ' ઇતિ । ન વિક્રિયત ઇત્યવિકૃતિઃ । ન કુતશ્ચિદુત્પાદ્યત ઇત્યર્થઃ । એતત્પ્રથમં તત્ત્વમ્ ॥

'મહદાદ્યાઃ પ્રકૃતિવિકૃતયઃ સપ્ત' ઇતિ । મહાન્ બુદ્ધિસ્સ આદ્યો યાસાં પ્રકૃતીનાં તાસ્તથોક્તાઃ । પ્રકૃતયશ્ચ વિકૃતયશ્ચેતિ પ્રકૃતિવિકૃતયઃ । તત્ર મહાનહઙ્કારં જનયન્ પ્રકૃતિઃ, મહત ઉત્પદ્યમાનો વિકૃતિઃ । તન્માત્રાણિ શબ્દસ્પર્શરૂપરસગન્ધાઃ પઞ્ચ યથાક્રમમાકાશવાય્વગ્ન્યુદકપૃથિવ્યાખ્યાનિ ભૂતાનિ જનયન્તઃ પ્રકૃતયઃ, અહઙ્કારાદુત્પદ્યમાના વિકૃતયઃ । ઇત્યેતાનિ સપ્ત તત્ત્વાનિ ॥

'ષોડશકશ્ચ વિકારઃ' ઇતિ । ષોડશ પરિમાણમસ્યેતિ ષોડશકઃ । પઞ્ચ બુદ્ધીન્દ્રિયાણિ, પઞ્ચ કર્મેન્દ્રિયાણિ, મનશ્ચેત્યેકાદશેન્દ્રિયાણિ, પઞ્ચ મહાભૂતાનીત્યયં ષોડશકો ગણઃ । ચકાર એવકારાર્થઃ । વિકારો વિકૃતિરેવ । (નાસ્માત્ કિઞ્ચિદુત્પદ્યત ઇત્યર્થઃ । એતાનિ ષોડશ તત્ત્વાનિ) । 'ન પ્રકૃતિર્ન વિકૃતિઃ પુરુષઃ' ઇતિ । પુરં શરીરં તસ્મિન્ વસતીતિ પુરુષઃ । નૈરુક્તોઽત્રવિધિઃ । તસ્માન્ન કિઞ્ચિદુત્પદ્યત ઇતિ ન પ્રકૃતિઃ, નિષ્ક્રિયત્વાત્ । નાપ્યયં કુતશ્ચિદુત્પદ્યત ઇતિ ન વિકૃતિઃ, અનાદિત્વાત્ ॥ ૩॥

કારિકા ૪

એષાં વ્યક્તાદીનાં સિદ્ધૌ પ્રમાણાન્યાહ-
॥ દૃષ્ટમનુમાનમાપ્તવચનં ચ, સર્વપ્રમાણસિદ્ધત્વાત્ ।
ત્રિવિધં પ્રમાણમિષ્ટં, પ્રમેયસિદ્ધિઃ પ્રમાણાદ્ધિ ॥ ૪ ॥ ॥

'દૃષ્ટમ્' ઇત્યાદિ । દૃષ્ટં પ્રત્યક્ષમ્ । અનુમીયતે યેન તદનુમાનમ્ । આપ્તઃ ક્ષીણદોષસ્તેન યદુચ્યતે તદાપ્તવચનમ્ । આગમઃ । એતત્ ત્રિવિધં પ્રમાણમિષ્ટમ્ ॥

નનુ ચાન્યાન્યપિ પ્રતિભાદીનિ પ્રમાણાનિ સન્તિ તદ્યથા-

પ્રતિભૌપમ્યમૈતિહાસમભાવસ્સમ્ભવસ્તથા ।
અર્થાપત્તિરિતીમાનિ પ્રમાણાન્યપરે જગુઃ ॥ ઇતિ ॥

અસ્મિન્ પૂર્વપક્ષ આહ- 'સર્વપ્રમાણસિદ્ધત્વાત્' ઇતિ । સર્વેષાં પ્રતિભાદીનાં પ્રમાણાનાં સિદ્ધત્વાત્, ત્રિવિધ એવાન્તર્ભાવાદિત્યર્થઃ । તત્ર ગ્રામે નગરે વા વર્તત ઇતિ પ્રતિભોત્પન્ના । તત્ર યદા ક્ષીણદોષસ્ય, તદાભિજ્ઞપ્રાપ્તત્વાત્ પ્રત્યક્ષમેવ । તસ્યાક્ષીણદોષસ્ય વિતથત્વાદપ્રમાણમ્ । યાપ્યર્થાવિસંવાદિની કાદાચિત્કા, સાપિ કાદાચિત્કાદેવ નિમિત્તાદુત્પદ્યમાનાનુમાનમેવ ન પ્રમાણાન્તરમ્ । 'ગૌરિવ ગવયઃ' ઇત્યૌપમ્યમ્ । તત્ર ગવયમજાનાનઃ કશ્ચિદાપ્તં પૃચ્છતિ 'કીદૃશો ગવયઃ', ઇતિ । સ તમાહ- 'યાદૃશો ગૌસ્તાદૃશો ગવયઃ' ઇતિ । તદેતદાપ્તવચનમેવ ન પ્રમાણાન્તરમ્ । યદાપિ લબ્ધોપદેશો ગવયં પશ્યતિ, તદાપિ ગવિ દૃષ્ટેનૈવ વિષાણાદિના લિઙ્ગેન ગવયસ્ય વ્યવહારં પ્રવર્તયતીત્યનુમાનમેવ ન પ્રમાણાન્તરમ્ । 'ઇતિહ વૈ વૈશ્રવણઃ' ઇત્યૈતિહ્યમ્ । એતદાપ્તવચનમેવ ન પ્રમાણાન્તરમ્ । 'ઇતિહ' ઇતિ નિપાતસમુદાય ઉપદેશપારમ્પર્યે વર્તતે । ઇતિહ એવૈતિહ્યમ્ । સ્વાર્થે યઞ્ । 'નાસ્તીહ ઘટોઽનુપલમ્ભાત્' ઇત્યભાવઃ । તત્ર ઘટશૂન્યપ્રદેશ એવ ઘટાભાવઃ, સ ચ પ્રત્યક્ષપ્રમાણસિદ્ધત્વાન્ન પ્રમાણાન્તરમ્ । 'માષઃ પ્રસ્થ ઇત્યુક્તે ચત્વારઃ કુડપા ઇતીદમપિ સમ્ભવતિ' ઇત્યયં સમ્ભવઃ । તત્ર સમુદાયલિઙ્ગાવયવલિઙ્ગિનઃ પરિચ્છેદાદનુમાનમેવ । અવયવૈસ્સમુદાયસ્યારબ્ધત્વાત્ કાર્યકારણલક્ષણઃ સમ્બન્ધઃ । 'દેવદત્તો દિવા ન ભુઙ્ક્તે બલવાંશ્ચેત્યુક્ત અર્થાદ્રાત્રૌ ભુઙ્ક્તે' ઇત્યર્થાપત્તિઃ । તત એવ રાત્રૌ તસ્ય પ્રતીતિરનુમાનાન્ન ભિદ્યતે । ઇદમેવ ચાન્યથાનુપપત્તિરિત્યુચ્યતે ॥

કિં પ્રમાણત્રયલક્ષણે પ્રયોજનમિતિ ચેદાહ- 'પ્રમેયસિદ્ધિઃ પ્રમાણાદ્ધિ' ઇતિ । યસ્માત્ પ્રમેયસ્યાર્થસ્ય સિદ્ધિઃ પ્રમાણાત્, અન્યથા કથં તત્પ્રાપ્તિપરિહારૌ સ્યાતામ્ ॥ ૪॥

કારિકા ૫

દૃષ્ટાદિપ્રમાણાનાં લક્ષણમાહ-
॥ પ્રતિવિષયાધ્યવસાયો દૃષ્ટં, ત્રિવિધમનુમાનમાખ્યાતમ્ ।
તલ્લિઙ્ગલિઙ્ગિપૂર્વકમ્, આપ્તશ્રુતિરાપ્તવચનં ચ ॥ ૫ ॥ ॥

'પ્રતિવિષયાધ્યવસાયઃ' ઇત્યાદિ । વિષયં વિષયં પ્રતિવિષયમ્, પ્રતિવિષયમધ્યવસાયઃ પ્રતિવિષયાધ્યવસાયઃ । વિષયાઃ શબ્દાદયઃ, અધ્યવસાયો બુદ્ધિઃ । શબ્દસ્પર્શરૂપરસગન્ધેષુ યથાક્રમં શ્રોત્રત્વક્ચક્ષુર્જિહ્વાઘ્રાણેન્દ્રિયદ્વારેણ વિશેષાવધારણપ્રધાના યા બુદ્ધિરુત્પદ્યતે તદ્ દૃષ્ટમ્, શુદ્ધત્વાત્પ્રમાણમશુદ્ધત્વાદપ્રમાણમ્ । તચ્ચતુર્વિધમ્- સવ્યપદેશમ્, સવિકલ્પમ્, અર્થવ્યતિરેકીન્દ્રિયવ્યતિરેકી ચેતિ । તત્ર દૂરાત્ ક્વચિદાગચ્છન્તં દૃષ્ટ્વા દેવદત્તસારૂપ્યં વ્યપદિશતિ દેવદત્તોઽયમિતિ યા બુદ્ધિરુત્પદ્યતે તત્સવિકલ્પમ્, સંશયિતત્વાદપ્રમાણમ્ । તૈમિરિકસ્ય દ્વિચન્દ્રદર્શનં તદર્થવ્યતિરેકિ, દ્વિતીયચન્દ્રાભાવાત્ । યત્સ્વપ્નદર્શનં તદિન્દ્રિયવ્યતિરેકિ, નિદ્રોપપ્લુતત્વાદિન્દ્રિયાણામ્ ॥

'ત્રિવિધમનુમાનમાખ્યાતમ્' ઇતિ । ષષ્ટિતન્ત્રે વ્યાખ્યાતમ્- પૂર્વવત્, શેષવત્, સામાન્યતોદૃષ્ટમિતિ । અતીતાનાગતવર્ત્તમાનાસ્ત્રયઃ પદાર્થાઃ । તત્ર ભવિષ્યદર્થસાધનાય પૂર્વવદનુમાનમ્ । પૂર્વં લિઙ્ગમસ્યાસ્તીતિ પૂર્વવત્ । યથોન્નતજલધરં દૃષ્ટ્વા વૃષ્ટિર્ભવિષ્યતીત્યનુમીયતે । અતીતાર્થસાધનાય શેષવત્- શેષં લિઙ્ગમસ્યાસ્તીતિ । યથાસ્યા નદ્યા ઉપરિ વૃષ્ટિર્ભૂતા, યસ્યાઃ કલુષોદકં શેષં લિઙ્ગમિતિ । વર્ત્તમાનાર્થસાધનાય સામાન્યતોદૃષ્ટમ્- સામાન્યેન લિઙ્ગલિઙ્ગિદૃષ્ટત્વાત્ । યથા દેવદત્તસ્ય ગતિપૂર્વિકા દેશાન્તરપ્રાપ્તિર્દૃષ્ટા, તથા સૂર્યાદીનાં સામાન્યેન દેશાન્તરપ્રાપ્ત્યા ગતિરનુમીયતે ॥

'તલ્લિઙ્ગલિઙ્ગિપૂર્વકમ્' ઇતિ । ત્રિવિધમનુમાનમ્ । કદાચિલ્લિઙ્ગપૂર્વકં કદાચિલ્લિઙ્ગિપૂર્વકં લોકે દૃશ્યતે । તદ્યથા- શ્રાવ્યેણ વિરુતેન કદાચિત્કોકિલોઽનુમીયતે, કદાચિત્કોકિલં લિઙ્ગિનં દૃષ્ટ્વા શ્રાવ્યેણાપિ વિરુતેનાસ્ય ભવિતવ્યમિતિ તયોર્ગમ્યગમકત્વં સતિ સમ્બન્ધે । સમ્બન્ધાશ્ચ સપ્ત- તત્ર સ્વસ્વામિભાવસમ્બન્ધો યથા રાજપુરુષયોઃ કદાચિત્પુરુષેણ રાજા રાજ્ઞા વા પુરુષઃ । એવં પ્રકૃતિવિકારસમ્બન્ધો યથા યવસક્તોઃ । કાર્યકારણસમ્બન્ધો યથા ધેનુવત્સયોઃ । પાત્રપાત્રિકસમ્બન્ધો યથા પરિવૃટ્ત્રિવિષ્ટબ્ધયોઃ । સાહચર્યસમ્બન્ધો યથા ચક્રવાકયોઃ । પ્રતિદ્વન્દ્વિસમ્બન્ધો યથા શીતોષ્ણયોઃ । તત્રૈકસ્ય ભાવેઽન્યાભાવઃ પ્રતીયતે । નિમિત્તનૈમિત્તિકસમ્બન્ધો યથા ભોજ્યભોજકયોરિતિ । એભિસ્સમ્બન્ધૈસ્ત્રિવિધમનુમાનં પ્રમાણન્ન લુપ્યતે ॥

'આપ્તશ્રુતિરાપ્તવચનં ચ' ઇતિ । આપ્તઃ ક્ષીણદોષઃ । યચ્ચાહુઃ-
સ્વકર્મણ્યભિયુક્તો યો રાગદ્વેષવિવર્જિતઃ ।
નિર્વૈરઃ પૂજિતઃ સદ્ભિરાપ્તો જ્ઞેયઃ સ તાદૃશઃ ॥ ઇતિ ॥

આપ્તેભ્યો યા શ્રુતિપરમ્પરયા શ્રુતિરાગતા આપ્તવચનમ્, તૈર્દૃષ્ટોऽનુમિતો
વાર્થઃ, પરત્ર સ્વબોધસદૃશબોધાન્તરોત્પત્તયે શબ્દેનોપદિશ્યતે ।
યદન્યવચનં સો ન પ્લવતે (?) । ચશબ્દોऽનુમાનેન
તુલ્યકક્ષ્યત્વખ્યાપનાર્થઃ । યથા ત્રિકાલમવિષયમન્માનં
તથાપ્તવનનમપીતિ ॥ ૫॥

કારિકા ૬

એષાં ત્રયાણાં કઃ કસ્ય વિષય ઇત્યત આહ-
॥ સામાન્યતસ્તુ દૃષ્ટાદતીન્દ્રિયાણામ્પ્રતીતિરનુમાનાત્ ।
તસ્માદપિ ચાસિદ્ધં પરોક્ષમાપ્તાગમાત્ સિદ્ધમ્ ॥ ૬ ॥ ॥

'સામાન્યતસ્તુ' ઇત્યાદિ । ત્રિવિધં પ્રમેયમ્- પ્રત્યક્ષમ્, પરોક્ષમ્,
અત્યન્તપરોક્ષં ચેતિ । તત્ર યત્સામાન્યતોદૃષ્ટમનુમાનં તસ્માદતીન્દ્રિયાણાં
પરોક્ષાણાં પ્રસિદ્ધિરસ્તિ । તન્નિશ્ચયઃ, તેષાં પ્રત્યક્ષવિષયત્વાત્ ।
પૂર્વવચ્છેષવતોસ્ત્વમનુમાનયોર્ભવિષ્યદ્ભૂતાર્થવૃત્તિત્વાદ્વર્ત્તમાનેષ્વતીન્દ્રિયેષુ
ચ પ્રવૃત્ત્યસમ્ભવઃ ॥

'તસ્માદપિ ચાસિદ્ધમ્' ઇતિ । સામાન્યતોદૃષ્ટાદનુમાનાદ્યદસિદ્ધં પરોક્ષમ્,
તદત્યન્તપરોક્ષત્વાદાગમાત્સિદ્ધમ્ । યથા સ્વર્ગાપવર્ગાવિતિ । પ્રત્યક્ષે
તુ પ્રમેયે દૃષ્ટમેવ વ્યાપ્રિયત ઇત્યર્થાદુક્તમ્ ॥ ૬॥

કારિકા ૭

નનુ ચ 'વ્યક્તાવ્યક્તજ્ઞવિજ્ઞાનાત્', વ્યક્તં
તાવત્ પ્રત્યક્ષાનુમાનાભ્યાં સિદ્ધમ્, પ્રધાનપુરુષયોસ્તુ
સર્વદાનુપલમ્ભાત્ કથં સિદ્ધિર્નસ્તયોરિતિ નાનુપલબ્ધિમાત્રેણાસત્ત્વમ્ ।
યતશ્ચતુર્ભિઃ પ્રકારૈઃ સતામપિ પદાર્થાનામુપલબ્ધિર્ભવતિ ।
દેશદોષાદિન્દ્રિયદોષાદ્વિષયદોષાદર્થાન્તરદોષાચ્ચ । તાનેવ ભેદેન
દર્શયન્નાહ-
॥ અતિદૂરાત્સામીપ્યાદિન્દ્રિયઘાતાન્મનોऽનવસ્થાનાત્ ।
સૌક્ષ્મ્યાદ્વ્યવધાનાદભિભવાત્સમાનાભિહારાચ્ચ ॥ ૭ ॥ ॥

'અતિદૂરાત્' ઇત્યાદિ । યથા દૂરમુત્પતિતસ્ય પક્ષિણો નોપલબ્ધિઃ ॥

'સામીપ્યાત્' ઇતિ । અતિશબ્દોઽત્રાપિ યોજનીયઃ । અતિસામીપ્યાદિતિ । યથા ચક્ષુઃસ્થસ્યાઞ્જનસ્ય । ઉભયત્રાપિ દેશદોષકૃતાનુપલબ્ધિઃ ॥

'ઇન્દ્રિયઘાતાત્' ઇતિ । શ્રોત્રાદીનાં બુદ્ધીન્દ્રિયાણાં દોષાદ્યોગ્યદેશાવસ્થિતાનામપિ શબ્દાદીનામનુપલબ્ધિઃ ॥

'મનોઽનવસ્થાનાત્' ઇતિ । મનસોઽનવસ્થાનમસમાહિતતા, વિષયાન્તરપ્રવૃત્તત્વાત્ । તતશ્ચાનુપહતેન્દ્રિયેઽપિ સન્નિહિતં વિષયં નોપલભતે । ઉભયત્રાપીન્દ્રિયદોષાદનુપલબ્ધિઃ । મનસોઽપીન્દ્રિયત્વાદ્ ભેદેનોપાદાનં તુ મનસઃ પ્રાધાન્યાર્થમ્ ॥

'સૌક્ષ્મ્યાત્' ઇતિ । વિષયદોષાત્ । વિષય એવ પરમાણ્વાદિસ્તથા, યેનાવ્યગ્રમનસાઽપ્યનુપહતેન્દ્રિયેણ નોપલભ્યતે ॥

'વ્યવધાનાત્' ઇતિ । યવનિકાદિભિસ્તિરોધાનાત્ સ્થૂલા અપ્યવિકૃષ્ટા ઘટાદયો નોપલભ્યન્તે ॥

'અભિભવાત્' ઇતિ । આદિત્યપ્રભાભિભૂતત્વાત્ દિવા તારકા નોપલભ્યન્તે ॥

'સમાનાભિહારાચ્ચ' ઇતિ । સદૃશાનાં રાશીકરણાત્ ધાન્યરાશૌ હ્યેકો ધાન્યગુડકઃ પ્રક્ષિપ્તો ન દૃશ્યતે । ત્રિષ્વપ્યર્થાન્તરદોષાદનુપલબ્ધિઃ । નત્વેત અનુપલભ્યમાના ન સન્તિ ॥ ૭॥

કારિકા ૮

યદ્યેવં કેન પ્રકારેણ સતોરપિ પ્રધાનપુરુષયોરનુપલબ્ધિરિત્યાહ-
॥ સૌક્ષ્મ્યાત્તદનુપલબ્ધિર્નાભાવાત્ કાર્યતસ્તદુપલબ્ધેઃ ।
મહદાદિ તચ્ચ કાર્યં પ્રકૃતિસરૂપં વિરૂપં ચ ॥ ૮ ॥ ॥

'સૌક્ષ્મ્યાત્તદનુપલબ્ધિઃ' ઇત્યાદિ । પ્રકારાન્તરાભાવાત્ સૂક્ષ્મત્વાત્સતોરપિ તયોરનુપલબ્ધિઃ । નન્વભાવાદેવ કસ્માદનુપલબ્ધિર્ન ભવતિ । યથા ઘટસ્યોત્પત્તેઃ પ્રાક્ મૃત્ શરાદિષુ ॥ તસ્ય પ્રધ્વંસાભાવાત્, ગવિ વાશ્વત્વસ્યાશ્વત્વે વા ગોત્વસ્યેતરેતરાભાવાત્, વન્ધ્યાસુતસ્ય વાત્યન્તાભાવાદિત્યાહ- 'નાભાવાત્' ઇતિ । ચતુર્વિધાદિત્યર્થઃ ॥

યદ્યેવં કથં તૌ સ્ત ઇતિ ગમ્યત ઇત્યાહ- 'કાર્યતસ્તદુપલબ્ધેઃ' ઇતિ । યદ્યપ્યત્રોભયં પ્રક્રાન્તં તથાપિ તચ્છબ્દેન પ્રધાનં નિર્દિશ્યતે ।

પ્રધાનસ્યાસ્તિત્વપ્રતિપત્તિઃ કાર્યાદિત્યર્થઃ । પુરુષસ્યાસ્તિત્વપ્રતિપત્તૌ હેતું વક્ષ્યતિ ॥

કિં તત્કાર્યમિત્યાહ- 'મહદાદિ તચ્ચ કાર્યમ્' ઇતિ । મહાન્ બુદ્ધિઃ સ આદિર્યસ્ય તન્મહદાદિભૂતપર્યન્તં કાર્યમસ્તિ । તત્ પ્રધાનમ્, યસ્યેદં મહદાદિકાર્યં વ્યક્તમ્, અકારણસ્ય કાર્યસ્યાનુત્પાદાત્ ॥

'પ્રકૃતિસરૂપં વિરૂપં ચ' ઇતિ । તદ્વ્યક્તં પ્રકૃતેઃ પ્રધાનસ્ય સદૃશમસદૃશં ચેત્યર્થઃ । એતદુત્તરત્ર યોજયિષ્યતે ॥ ૮॥

કારિકા ૯

તત્કાર્યં કારણાદુત્પદ્યમાનં સદુત્પદ્યતે, કિમસત્, કિં વા સદસદિતિ? તત્ર વિરુદ્ધધર્માધ્યાસિતત્વાત્સદસન્નોપપદ્યતે । અસદિતિ વૈશેષિકાઃ ।
અત્ર દૂષણમાહ-
॥ અસદકરણાદુપાદાનગ્રહણાત્ સર્વસમ્ભવાભાવાત્ ।
શક્તસ્ય શક્યકરણાત્, કારણભાવાચ્ચ સત્કાર્યમ્ ॥ ૯ ॥ ॥

'અસદકરણાત્' ઇત્યાદિ । ઇહ લોકે અસતઃ કરણં નાસ્તિ, યથા શશવિષાણાદીનામ્ । યદેવ સત્ ઘટાદિદ્રવ્યં તદેવ મૃત્પિણ્ડાદિના કારણવિશેષેણ ક્રિયતે, નાસત્ ॥

'ઉપાદાનગ્રહણાત્' ઇતિ । ઇહ યદર્થં યદુપાદીયતે તસ્ય તદુપાદાનં કારણમ્, યથા તૈલસ્ય તિલાઃ, દધ્નઃ ક્ષીરમ્ । અત્ર તૈલં દધિ ચ યદિ ન સ્યાત્ કથં તસ્યોપાદાનસ્ય ગ્રહણં તદર્થિભિઃ ક્રિયતે । તસ્માદુપાદાનસંગ્રહાત્ સદેવ કાર્યમ્ । અન્યથા સિકતાસલિલયોરપિ ગ્રહણં સ્યાત્ ॥

'સર્વસમ્ભવાભાવાત્' ઇતિ । યદ્યસત્કાર્યં ભવેત્ તદા સર્વસ્ય સર્વત્ર સમ્ભવઃ સ્યાત્ । ન ચૈવમ્ । તસ્માત્સદેવ કાર્યમ્ ॥

'શક્તસ્ય શક્યકરણાત્' ઇતિ શક્તં કારણં નાશક્તમિત્યેવમપ્યવગન્તવ્યમ્ । અન્યથોપહતશક્તિર્બીજાઙ્કુરોત્પત્તિપ્રસઙ્ગઃ । શક્તશ્ચ કો ભવિતુમર્હતિ, યઃ શક્તિમાન્ । તસ્ય શક્તિમતઃ શક્યસ્ય કરણાત્, શકનીયસ્ય કાર્યસ્યોત્પાદનાદિત્યર્થઃ । એવં ચ તચ્છકનીયં યદિ કારણે શક્તિરૂપેણાવસ્થિતં સ્યાત્ । તસ્માત્સદેવોત્પદ્યતે નાસત્ ॥

'કારણભાવાચ્ચ' ઇતિ । કારણસ્ય સત્ત્વાદિત્યર્થઃ । યદ્યસત્કાર્યમુત્પદ્યતે કિમિતિ કારણભાવેન કાર્યસ્ય ભાવો ભવતિ । ભવતિ ચ ।

તસ્માચ્છક્તિરૂપેણાવસ્થિતમિતિ ગમ્યતે । અથવા- કારણભાવાદિતિ
કારણસ્વભાવાત્ । યત્સ્વભાવં કારણં તત્સ્વભાવં કાર્યમ્, યથા
સ્નિગ્ધસ્વભાવસ્તિલેભ્યઃ સ્નિગ્ધમેવ તૈલમ્, મૃતો મૃત્સ્વભાવો ઘટઃ ।
યદ્યસત્કાર્યં સ્યાત્, અસત્સ્વભાવેભ્યો હ્યુત્પાદ્યેતેત્યેવં સાંખ્યાનાં
સદેવોત્પદ્યત ઇતિ સિદ્ધાન્તઃ ॥ ૯॥

કારિકા ૧૦

એવં મહદાદિકાર્યં સદેવોત્પદ્યત ઇતિ વ્યવસ્થાપ્ય પ્રકૃતેર્વિરૂપં સરૂપં
ચ દર્શયતિ । તત્ર પ્રકૃતેર્વિરૂપમધિકૃત્યાહ-
॥ હેતુમદનિત્યમવ્યાપિ સક્રિયમનેકમાશ્રિતં લિઙ્ગમ્ ।
સાવયવં પરતન્ત્રં વ્યક્તં, વિપરીતમવ્યક્તમ્ ॥ ૧૦ ॥ ॥

'હેતુમત્' ઇત્યાદિ । વ્યક્તં મહદાદિભૂતપર્યન્તમ્ । અવ્યક્તં પ્રધાનં
તત્ર વ્યક્તં હેતુમત્, યથાસ્વં કારણેભ્ય ઉત્પદ્યમાનત્વાત્ ।
તત્ર પ્રધાનાદુત્પદ્યમાનો મહાન્ હેતુમાન્, મહતોઽહઙ્કારો હેતુમાન્,
અહઙ્કારાત્તન્માત્રાણ્યેકાદશેન્દ્રિયાણ્યુત્પદ્યમાનાનિ હેતુમન્તિ ચ,
તન્માત્રેભ્યશ્ચ મહાભૂતાનિ હેતુમન્તિ । વિપરીતમવ્યક્તમહેતુમદિત્યર્થઃ,
તસ્યાન્યતઃ કુતશ્ચિદનુત્પાદાત્ । નહિ પ્રધાનાકિંચિદપરમસ્તિ
યતસ્તદુત્પદ્યતે ॥

અનિત્યં વ્યક્તમ્, કારણેભ્ય ઉત્પન્નત્વાત્ ઘટાદિવત્ । કારણાનિ ચ પ્રાગુક્તાન્યેવ ।
વિપરીતમવ્યક્તં નિત્યમિત્યર્થઃ, કુતશ્ચિદનુત્પન્નત્વાત્ ॥

અવ્યાપિ વ્યક્તં પ્રાદેશિકમિત્યર્થઃ । દૈવં માનુષં તૈર્યગ્યોનં ચ,
તદાનીમન્યત્રાવર્તમાનત્વાત્ । સર્વગતં વિપરીતમવ્યક્તં વ્યાપીત્યર્થઃ,
દેવાદિષુ ત્રિષુ લોકેષુ સર્વદા વર્તમાનત્વાત્ ।
'સક્રિયમ્' ઇતિ । ક્રિયાશબ્દેનાત્ર સંસરણમભિપ્રેતમ્, ન ક્રિયામાત્રમ્ ।
મહદાદિસૂક્ષ્મપર્યન્તં વ્યક્તં દેવાદિ સંસરતીત્યર્થઃ । વિપરીતમવ્યક્તમ્,
અસંસારિ । ત્રિષુ લોકેષુ સ્થિતત્વાન્ન સંસરતિ । ન પુનઃ ક્રિયૈવ નાસ્તીતિ
નિષ્ક્રિયમ્, તસ્ય જગત્કર્તૃત્વાત્ ॥

અનેકં વ્યક્તમ્, મહદાદિભૂતપર્યન્તતાયાસ્ત્રયોવિંશતિપ્રકારત્વાત્ । વિપરીતં
વ્યક્તમ્, ત્રયાણાં લોકાનાં તસ્યૈકસ્ય કારણત્વાત્ ॥

'આશ્રિતમ્' ઇતિ । યદ્યસ્માદુત્પન્નં મહદાદિ વ્યક્તં તદેવ તદાશ્રિતં
નાન્યત્ । ઉત્પન્નમન્યદાશ્રિતમિતિ દર્શનાર્થં વચનમ્, અન્યથા

હેતુમદિત્યનેનૈવાશ્રિતં સિદ્ધમેવ । વિપરીતમવ્યક્તમ્, અનાશ્રિતમ્ ।
તતોઽન્યસ્ય કારણસ્યાભાવાત્ ॥

'લિઙ્ગમ્' ઇતિ । લિઙ્ગ્યતેઽનેનાવ્યક્તમિતિ લિઙ્ગમ્ । વિપરીતમવ્યક્તમ્,
ન લિઙ્ગ્યતે કિઞ્ચિદનેનેતિ । અથવા લયં ગચ્છતીતિ લિઙ્ગમ્ ।
પ્રલયકાલે હ્યાકાશાદયઃ પઞ્ચ યથાક્રમં શબ્દાદિતન્માત્રેષુ લીયન્તે,
તન્માત્રાણીન્દ્રિયાણિ ચાહઙ્કારે, અહઙ્કારો મહતિ, મહાન્પ્રધાન ઇતિ ।
વિપરીતમવ્યક્તમ્, ન કુત્રચિદિદં લીયતે, અહેતુત્વાત્ ॥

'સાવયવમ્' ઇતિ । શબ્દાદયોઽવયવા ઉચ્યન્તે । તૈરાધ્યાત્મિકં બાહ્યં ચ
વ્યક્તં યુક્તમ્ । વિપરીતમવ્યક્તમ્, તૈરયુક્તત્વાત્ ॥

પરતન્ત્રમ્ । ન સ્વતન્ત્રમ્ । યદસ્માદુત્પદ્યતે તદેવાનુરુદ્ધ્ય સ્વકાર્યં
જનયતિ ન તદ્વ્યતિરેકેણેતિ દર્શનાર્થમ્ । અન્યથા હેતુમદિત્યનેનૈવ
પરતન્ત્રત્વં પ્રસિદ્ધમેવ । વિપરીતમવ્યક્તમ્, સ્વતન્ત્રં ન
કિંચિદપેક્ષતે ॥ ૧૦॥

કારિકા ૧૧

સારુપ્યમધિકૃત્યાહ-
॥ ત્રિગુણમવિવેકિ વિષયઃ સામાન્યમચેતનમ્પ્રસવધર્મિ ।
વ્યક્તં, તથા પ્રધાનમ્, તદ્વિપરીતસ્તથા ચ પુમાન્ ॥ ૧૧ ॥ ॥

'ત્રિગુણમ્' ઇત્યાદિ । ત્રયસ્સત્ત્વાદયો ગુણા યસ્ય તત્રિગુણં વ્યક્તમ્ । તથા
પ્રધાનમપિ ત્રિગુણં તત્સ્વભાવત્વાત્ ॥

'અવિવેકિ' ઇતિ । અવિવેચનશીલં વ્યક્તમ્, અચેતનત્વાત્ । યદ્વા ગુણેભ્યસ્તસ્ય
પૃથક્ત્વાભાવાદવિવેકિ । તથા પ્રધાનમપિ ॥

સામાન્યં વ્યક્તમ્, સર્વપુરુષોપભોગ્યત્વાન્મલ્લદાસીવત્ । તથા પ્રધાનમપિ ॥

અચેતનં વ્યક્તમ્, સુખદુઃખમોહાન્ન વેદયતીત્યર્થઃ । તથા પ્રધાનમપિ ॥

'પ્રસવધર્મિ' ઇતિ । પ્રસવો ધર્મોઽસ્યાસ્તીતિ પ્રસવધર્મિ વ્યક્તમ્ ।
તથા પ્રધાનમપિ । દ્વયોરપિ પ્રસવધર્મિત્વમ્ ॥

તથા ચ પ્રધાનાન્મહાન્, મહતોઽહઙ્કાર ઇત્યાદિના
સ્વકાર્યોત્પાદનધર્મત્વાદ્યથા વ્યક્તાવ્યક્તયોર્વૈરૂપ્યં સારૂપ્યં ચ,
તથા કિં પુરુષસ્ય વાપીત્યાહ- 'તદ્વિપરીતસ્તથા ચ પુમાન્' ઇતિ ।

વ્યક્તાવ્યક્તાભ્યાં કૈશ્ચિદ્ધર્મૈર્વિલક્ષણ ઇત્યર્થઃ ॥

અત્ર પૂર્વસ્યા આર્યાયા અર્થો યોજ્યતે । હેતુમદ્વ્યક્તમ્, અહેતુમદવ્યક્તમ્ ।
પુરુષોઽપ્યહેતુમાન્, તસ્ય કુતશ્ચિદનુત્પાદાત્ ॥

અનિત્યં વ્યક્તમ્, નિત્યમવ્યક્તમ્ । પુરુષો નિત્યઃ, કુતશ્ચિદનુત્પન્નત્વાત્ ॥

અવ્યાપિ વ્યક્તમ્, વ્યાપ્યવ્યક્તમ્ । પુરુષોઽપિ વ્યાપી યદા પ્રકૃત્યા મુક્તઃ ।
યુક્તશ્ચેત્, વ્યક્તેન સદૃશો ન પ્રધાનેન । હિ સર્વદા દેવાદિષુ
પ્રવર્તતે ॥

સક્રિયં વ્યક્તમ્, નિષ્ક્રિયમવ્યક્તમ્, અસંસારિત્વાત્ । પુરુષોઽપિ નિષ્ક્રિયઃ,
કર્તૃત્વાભાવાત્ ॥

અનેકં વ્યક્તમ્, એકમવ્યક્તમ્ । પુરુષોઽનેકો બહુત્વાત્ । તસ્ય બહુત્વં
પ્રતિપાદયિષ્યતિ । પ્રધાનેનાત્ર વૈસાદૃશ્યં તસ્યૈકત્વાત્ ॥

આશ્રિતં વ્યક્તમ્, અનાશ્રિતમવ્યક્તમ્ । પુરુષોઽપ્યનાશ્રિતઃ
કુતશ્ચિદનુત્પન્નત્વાત્ ॥

લિઙ્ગં વ્યક્તમ્, અલિઙ્ગમવ્યક્તમ્ । પુરુષોઽપ્યલિઙ્ગઃ । ન કિંચિદનેન
લિઙ્ગ્યતે ન વાયં કદાચિલ્લીયતેઽનુત્પન્નત્વાત્ ॥

સાવયવં વ્યક્તમ્, નિરવયવમવ્યક્તમ્ । પુરુષોઽપિ નિરવયવઃ
શબ્દાદિભિરયુક્તત્વાત્ ।
પરતન્ત્રં વ્યક્તમ્, સ્વતન્ત્રમવ્યક્તમ્ । પુરુષોઽપિ સ્વતન્ત્રઃ,
કુતશ્ચિદનુત્પન્નત્વાત્ ॥

દ્વિતીયસ્યા આર્યાયા અર્થો યોજ્યતે-
ત્રિગુણં વ્યક્તમવ્યક્તં ચ । નિર્ગુણઃ પુરુષઃ, ગુણાનાં તત્રાભાવાત્ ॥

અવિવેકિ વ્યક્તમવ્યક્તં ચ । વિવેકી પુરુષશ્ચેતનત્વાત્ । વિવિક્તો વા
નિર્ગુણત્વાત્ ॥

વિષયો વ્યક્તમવ્યક્તં ચ । પુરુષો નિર્વિષયઃ, ભોક્તૃત્વાત્, ન ભોગ્યઃ ॥

સામાન્યં વ્યક્તમવ્યક્તં ચ । પુરુષોઽસામાન્યઃ, અવિષયત્વાત્ ॥

અચેતનં વ્યક્તમવ્યક્તં ચ । ચેતનઃ પુરુષઃ સુખાદિવેદનત્વાત્ ॥

પ્રસવધર્મિ વ્યક્તમવ્યક્તં ચ । પુરુષોઽપ્રસવધર્મી, અકર્તૃત્વાત્ ।

ઇત્યુક્તમ્ ॥ ૧૧॥

કારિકા ૧૨

ત્રયાણામપિ વૈરૂપ્યં સારૂપ્યં ચેતિ ત્રિગુણમિત્યુક્તે, કે કે ત્રયો ગુણાઃ
કિમાત્મકા ઇત્યાહ-

॥ પ્રીત્યપ્રીતિવિષાદાત્મકાઃ પ્રકાશપ્રવૃત્તિનિયમાર્થાઃ ।
અન્યોઽન્યાભિભવાશ્રયજનનમિથુનવૃત્તયશ્ચ ગુણાઃ ॥ ૧૨ ॥ ॥

'પ્રીત્યપ્રીતિવિષાદાત્મકાઃ' ઇત્યાદિ । પ્રીત્યાદય આત્માનો યેષાં ગુણાનાં તે
તથોક્તાઃ સત્ત્વરજસ્તમાંસિ ત્રયો ગુણાઃ । તત્ર પ્રીત્યાત્મકં સુખાત્મકં
સત્ત્વમ્, અપ્રીત્યાત્મકં દુઃખાત્મકં રજઃ, વિષાદાત્મકં મોહાત્મકં તમઃ ।
ગુણા હ્યતીન્દ્રિયત્વાત્પરિણત્યા સુખાદિનાનુમીયમાનાસ્તદાત્મકા ઇતિ વ્યપદિશ્યન્તે
॥

કિં પુનરેષાં પ્રયોજનમિત્યાહ- 'પ્રકાશપ્રવૃત્તિનિયમાર્થાઃ' ઇતિ ।
પ્રકાશાર્થં સત્ત્વં પ્રકાશકત્વાત્, પ્રવૃત્ત્યર્થં રજશ્ચલત્વાત્,
નિયમાર્થં તમઃ સ્તિમિતત્વાત્ ॥

કિમિતિ તે ગુણાઃ પરસ્પરસવ્યપેક્ષાઃ કિં વા નેત્યાહ-
'અન્યોઽન્યાભિભવાશ્રયજનનમિથુનવૃત્તયશ્ચ ગુણાઃ' ઇતિ ।
અન્યોઽન્યશબ્દઃ પ્રત્યેકમભિસમ્બધ્યતે । અભિભવતીત્યભિભવઃ ।
પચાદ્યચ્ । અન્યોઽન્યસ્યાભિભવા અન્યોઽન્યાભિભવાઃ । તદ્યથા દેવેષુ
સત્ત્વમુદ્રિક્તં રજસ્તમસી અભિભવતિ, મનુષ્યેષુ રજઃ સત્ત્વતમસી,
તિર્યક્ષુ (તમઃ સત્ત્વરજસી) । આશ્રીયન્ત ઇત્યાશ્રયાઃ । કર્મણ્યણ્ ।
અન્યોઽન્યસ્યાશ્રયાઃ, ત્રિદણ્ડવત્ । નાશ્રયાન્તરમેષામ્, અનાશ્રયાશ્ચ
કર્તારઃ । જનયન્તીતિ જનનાઃ । 'કૃત્યલ્યુટો બહુલમ્' ઇતિ કર્તરિ
લ્યુટ્ । અનેકાર્થત્વાત્ ચ ધાતૂનાં બોધનાર્થા દ્રષ્ટવ્યાઃ । અન્યોઽન્યસ્ય
પ્રબોધકા ઇત્યર્થઃ । સર્વં હિ વ્યક્તમુત્પદ્યમાનં ત્રિગુણાત્મકમુત્પદ્યતે ।
તત્ર યદા સત્ત્વમુત્કટં તદા રજસ્તમસી ન્યક્કૃતશક્તિકે ।
પ્રબોધ્યાયસ્કાન્તો લોહવદુક્તમ્ (?) । સત્વન્યત્કૃતેન ગુણેન વ્યક્તં
જનયતિ (?) એવં રજસ્તમશ્ચ યોજ્યમ્ । યદા ગુણદ્વયમુદ્ભૂતશક્તિ તદા
દ્વયમપીતરદભિભવતિ, પ્રબોધયતીત્યર્થઃ । અન્યોઽન્યમિથુના ઇતિ ।
અન્યોઽન્યસ્ય સહાયા ઇત્યર્થઃ । તથા ચોક્તં વિષ્ણુગીતાયામ્-
રજસો મિથુનં સત્ત્વં સત્ત્વસ્ય મિથુનં રજઃ ।

ઉભયોઃ સત્ત્વરજસોર્મિથુનં તમ ઉચ્યતે ॥

એકસ્યાં વ્યક્તૌ ત્રયાણામભિભવપ્રબોધનાનુક્તૌ વ્યક્તમ્, ઇતરે તુ તૌ
એવ પ્રવૃત્તિં જનયન્ત ઇતિ દર્શયન્નાહ- અન્યોઽન્યવૃત્તય ઇતિ ।
વૃત્તિઃ સુખાદિરૂપેણ પરિણતિઃ । વૃતિહેતુત્વાદ્ વૃત્તય ઉચ્યન્તે ।
અન્યોન્યવૃત્તિહેતવ ઇત્યર્થઃ । તદ્યથા કાચિદ્યોષિદ્રૂપશીલદત્યન્તગુણા
(!) સિતત્વાત્સાત્ત્વિકી સા ભર્ત્તુઃ સુખમુત્પાદયતિ સપત્નીનાં
કાસાંચિદ્દુઃખં કાસાંચિદ્વિષાદમિત્યત્ર સત્ત્વમાત્મનો દ્વયોશ્ચ
વૃત્તિહેતુઃ । કસ્યચિત્પ્રભોરત્યન્તશૂરત્વાદ્ ભૃત્યા રાજસાઃ,
પરેષાં યુધ્યમાનાનાં પ્રહારૈર્દુઃખં જનયન્તિ, પલાયમાનાનાં
વિષાદમ્, સ્વામિનશ્ચ તુષ્ટિમિત્યત્ર રજ આત્મનો દ્વયોસ્ચ વૃત્તિહેતુઃ ।
મેઘાંશ્ચામ્બુગુ ॥।વાનિષાન્ધકારીકૃત્યોન્નતત્વાત્ (?) તામસાઃ, તે
વર્ષન્તઃ પ્રોષિતભર્તૃકાણાં વિષાદં જનયન્તિ, પથિકાનાં દુઃખમ્
કૃષીવલાનાં તુષ્ટિમિત્યત્ર તમ આત્મનો દ્વયોશ્ચ વૃત્તિહેતુઃ ॥ ૧૨॥

કારિકા ૧૩

એષાં દુર્લક્ષણાનાં લક્ષણાન્તરમાહ-
॥ સત્ત્વં લઘુ પ્રકાશકમુપષ્ટમ્ભકં ચલં ચ રજઃ ।
ગુરુ વરણકમેવ તમઃ, પ્રદીપવચ્ચાર્થતો વૃત્તિઃ ॥ ૧૩ ॥ ॥

'સત્ત્વમ્' ઇત્યાદિ । ઇષ્ટં સાંખ્યાચાર્યાણાં સત્ત્વં લઘુસ્વભાવં પ્રકાશં ચ ।
યસ્યોદ્રેકાચ્છરીરેંઽશાનિ લઘૂનિ ભવન્તિ, વિષયપ્રકાશનસમર્થાનિ
ચેન્દ્રિયાણિ । બાહ્યાનિ ચ દ્રવ્યાણિ લઘૂનિ પ્રકાશાત્મકાનિ નિર્મલાનિ
ભવન્તિ ॥

'ઉપષ્ટમ્ભકં ચલં ચ રજઃ' ઇતિ । ઉપષ્ટમ્ભયતીત્યુપષ્ટમ્ભકમ્ ।
યસ્યોદ્રેકાદ્ દેવદત્તો વ્યવસ્યતિ, ચલચિત્તશ્ચ ભવતિ । બાહ્યાનિ ચલાનિ
ભવન્તીતિ ॥

'ગુરુ વરણકમેવ તમઃ' ઇતિ । વૃણોતિ પિધત્ત ઇતિ । 'કૃત્યલ્યુટો બહુલમ્'
ઇતિ કર્તરિ લ્યુટ્, કરણે વા । પશ્ચાત્ સ્વાર્થે કન્ । યસ્યોદ્રેકાદ્ ગુરૂણ્યઙ્ગાનિ
ભવન્તિ, ઇન્દ્રિયાણિ ચ તમસૈવાત્તાનિ ભવન્તિ । બાહ્યાનિ ચ ગુરૂણ્યનિર્મલાનિ
ચ ભવન્તિ ॥

ઉદાહરણદિગિયમન્યાન્યપિ વિજ્ઞેયાનિ ભવન્તિ । તથા
ચાહુઃ- પ્રીતિપ્રીતિ(?)સ્વાભિષઙ્ગલાઘવાનિ પ્રસાદહર્ષૌ

ચ, સ્તમ્ભૌદ્ધત્યદ્વેષચલનશોષણતાપભેદાશ્ચ,
વરણાપધ્વંસનસાદનગૌરવદૈન્યભીતયશ્ચૈતાનિ સત્ત્વરજસ્તમસાં
ક્રમેણ જ્ઞાતવ્યાનિ લિઙ્ગાનિ ॥

નનુ ચૈતે પરસ્પરવિલક્ષણા ગુણા વિરુદ્ધત્વાત્ કથં સમ્ભૂયૈકત્ર
વર્તન્ત ઇત્યાહ- 'પ્રદીપવચ્ચાર્થતો વૃત્તિઃ' ઇતિ । પ્રદીપસ્યેવ
પ્રદીપવત્ । તૈલવર્ત્ત્યગ્નિસમુદાયઃ પ્રદીપઃ । યદા સમુદાયાત્મ
॥ ।પરસ્પરવિલક્ષણાનામપિ પ્રદીપભા ॥ ।પ્રવૃતિઃ, તમસિ સ્થિતા
ઘટાદયો દેવદત્તસ્ય પ્રકાશયિતવ્યા ઇતિ, તથા સત્ત્વરજસ્તમસાં
પુરુષાર્થહેતુના પ્રવૃત્તિઃ, પુરુષાર્થશબ્દોપલબ્ધિશ્ચેતિ ॥ ૧૩॥

કારિકા ૧૪

નનુ ચ 'ત્રિગુણમવિવેકિ વિષયઃ સામાન્યમચેતનં પ્રસવધર્મિ વ્યક્તમ્',
તત્ર સુખદુઃકમોહોપલબ્ધેસ્ત્રૈગુણ્યં વ્યક્તં સિદ્ધમ્, અવિવેક્યાદયો ધર્માઃ
પ્રસવપર્યન્તાઃ કથં સિદ્ધ્યન્તીત્યાહ-

॥ અવિવેક્યાદિસ્સિદ્ધસ્ત્રૈગુણ્યાત્તદ્વિપર્યયાભાવાત્ ।
કારણગુણાત્મકત્વાત્કાર્યસ્યાવ્યક્તમપિ સિદ્ધમ્ ॥ ૧૪ ॥ ॥

'અવિવેક્યાદિઃ સિદ્ધઃ' ઇત્યાદિ । ગુણિદ્વારેણ ગુણાભિધાનમ્ ।
અવિવેક્યાદિગુણસ્સિદ્ધઃ । વ્યક્ત ઇતિ વાક્યશેષઃ ॥

કુતઃ? ત્રૈગુણ્યાત્ । કથં? યસ્માદ્ગુણા એવાવિવેકિનો ભોગ્યાસ્સામાન્યા અચેતના
પ્રસવધર્મિણશ્ચ, તે ચ વ્યક્તે સિદ્ધા ઇતિ સિદ્ધો ગુણઃ ॥

'તદ્વિપર્યયાભાવાત્' ઇતિ । (ત્રૈગુણ્યસ્યાભાવાદિતિ) ।
ત્રૈગુણ્યસ્યાભાવેऽવિવેક્યાદયોરભાવાત્ । ન હિ નિર્ગુણસ્ય પુરુષસ્યાવિવેક્યાદિઃ
સમ્ભવતિ । તસ્માત્ત્રૈગુણ્યાદેવાવિવેક્યાદિસ્સિદ્ધઃ ॥

એવં ચ સતિ, પ્રધાનમપિ ત્રૈગુણ્યાત્તથાવિધં સિદ્ધમ્ । યદાહ-
'કારણગુણાત્મકત્વાત્કાર્યસ્યાવ્યક્તમપિ સિદ્ધમ્' ઇતિ । કારણસ્ય યો ગુણઃ સ
આત્મા સ્વભાવો યસ્ય તત્તથોક્તમ્ । તસ્ય સ્વભાવસ્તત્ત્વમ્ । તસ્માદિહ લોકે
કારણગુણકં કાર્યં દૃષ્ટમ્ । શુક્લૈઃ કૃષ્ણૈર્વા તન્તુભિરારબ્ધઃ
પટઃ શુક્લઃ કૃષ્ણો વા ભવતિ । યદ્યવ્યક્તં તથાવિધં ન સ્યાત્, કથં
વ્યક્તં તથાવિધં ભવેત્ ॥ ૧૪॥

કારિકા ૧૫

નનુ ચ સતિ ધર્મિણિ ધર્માશ્ચિન્ત્યન્તે, પ્રધાનસ્યૈવ ધર્મિણોઽલબ્ધસિદ્ધિત્વાત્ કથમવિવેક્યાદીત્યાહ-

॥ ભેદાનાં પરિમાણાત્ સમન્વયાચ્છક્તિતઃ પ્રવૃત્તેશ્ચ ।
કારણકાર્યવિભાગાદવિભાગાદ્વૈશ્વરૂપ્યસ્ય ॥ ૧૫ ॥ ॥

'ભેદાનામ્' ઇત્યાદિ । કાર્યતસ્તદુપલબ્ધેર્મહદાદિ તચ્ચ કાર્યમિત્યનેનૈવ સાધિતેઽસ્મિન્ યથાવદધિગતે પુનર્દાર્ઢ્યાર્થં સમનન્તરોપાદાનમ્ । ભિદ્યન્ત ઇતિ ભેદાઃ કાર્યવિશેષાસ્તેષાં (એકસ્સંસર્ગી દૃષ્ટઃ) પરિમાણાચ્ચ । ભેદાનાં પરિમિતત્વાદિત્યર્થઃ । યેન ચ પરિમિતાસ્તેષામેકઃ સંસર્ગી દૃષ્ટઃ । યથા મૂલાઙ્કુરપત્રકાણ્ડપ્રસવપુષ્પતણ્ડુલકણાનાં ભેદાનાં વ્રીહિઃ તવિબાહ્યાધ્યાત્મિકભેદાઃ । પરિમિતબાહ્યા બ્રહ્માદિસ્તમ્બપર્યન્તાશ્ચતુર્દશ । આધ્યાત્મિકાશ્ચ મહદહઙ્કારતન્માત્રેન્દ્રિયભૂતાખ્યાસ્ત્રયોવિંશતિઃ । તસ્માદેતેષામેકેન સંસર્ગિણા ભવિતવ્યમ્ । યત્રૈષાં સંસર્ગસ્તદવ્યક્તં કારણમસ્તીતિ સામાન્યતોદૃષ્ટમનુમાનમ્ ॥

'સમન્વયાત્' ભેદાનામિતિ વર્તતે । સમન્વયોઽનુગમઃ । એકજાત્યનુગમાદિત્યર્થઃ । ય એકજાત્યનુગતા ભેદાસ્તેષામેકમેવ તથાભૂતં કારણં દૃષ્ટમ્ । યથા કટકકેયૂરાદીનાં સુવર્ણપિણ્ડઃ, યથા વા શરાવાદીનાં મૃત્પિણ્ડઃ । એવમેષામપિ બાહ્યાધ્યાત્મિકાનાં સુખદુઃખમોહાનુગતત્વાદેકેન તથાવિધેન ભવિતવ્યમ્ । ય એષાં સમુદાયસ્તત્પ્રધાનમિતિ સામાન્યતોદૃષ્ટમ્ ।
'શક્તિતઃ પ્રવૃત્તેશ્ચ' ઇતિ । ઇહ કુલાલાદિશક્તિપૂર્વિકા ઘટાદીનાં પ્રવૃત્તિર્દૃષ્ટા નાશક્તિપૂર્વિકા । એષામપિ બાહ્યાધ્યાત્મિકાનાં પ્રવૃત્તિર્દૃશ્યતે । તતશ્ચ પ્રાક્ ચ પ્રવૃત્તેર્જનિતયા શક્ત્યા ભવિતવ્યમ્ । યાસૌ શક્તિઃ સૈવાવ્યક્તભાવમાપદ્યત ઇતિ સામાન્યતોદૃષ્ટમ્ ॥

'કારણકાર્યવિભાગાત્' ઇતિ । કારણસ્ય પૂર્વભાવિત્વાત્ પૂર્વનિપાતઃ । અલ્પાચ્તરસ્ય પૂર્વનિપાતસ્યાનિત્યત્વમ્ । યત ઉત્પદ્યતે તત્કારણમ્, યચ્ચોત્પદ્યતે તત્કાર્યમ્ । યથા મૃત્પિણ્ડઘટયોર્જન્યજનકત્વેન પૃથગર્થક્રિયાકરણાચ્ચ વિભાગો દૃષ્ટઃ । અન્યથા ઘટાસ્યોદકાહરણક્રિયા યા ન સા મૃત્પિણ્ડસ્ય, યા મૃત્પિણ્ડસ્ય ન સા ઘટસ્ય । એવં વ્યક્તસ્ય મહદાદેઃ કાર્યત્વાત્પૃથગર્થક્રિયાકરણાચ્ચ વિભાગઃ ।

તસ્માદસ્ય કારણેન ભવિતવ્યમ્ । તચ્ચાવ્યક્તાત્કિમન્યત્ સ્યાદિતિ ॥

અસ્મિન્ વ્યાખ્યાને 'કાર્યતસ્તદુપલબ્ધેર્મહદાદિ તચ્ચ કાર્યમ્' ઇત્યનેનૈવ સિદ્ધત્વાદન્યૈરન્યથા વ્યાખ્યાયતે । યદુપકરોતિ તત્કારણમ્, યદુપક્રિયતે તત્કાર્યં તયોર્વિભાગાત્, ઉપકાર્યોપકારકભાવાદિત્યર્થઃ । તત્ર કાર્ય ॥ ।વ્યાદીનિ શરીરસ્થાનિ સ્થાનસાધના ॥ ।વભોગૈઃ કારણાન્યુપકુર્વન્તિ । કારણાનિ ચ વૃદ્ધિક્ષતસંરોહણપાલનૈઃ કાર્યાણિ । બાહ્યાનિ ચ કારણાનિ પૃથિવ્યા ધૃતિસઙ્ગ્રહપત્તિવ્યૂહનાવકાશદાનૈઃ પરસ્પરમુપકુર્વન્તિ । તથા દૈવમાનુષતૈર્યગ્યોનાનિ પરસ્પરોપકારીણિ । તત્ર દૈવમ્, યથાકાલં શીતોષ્ણવર્ષાગમઃ, માનુષતૈર્યગ્યોનાન્યુપકરોતિ । માનુષમિજ્યાયાગસ્તુતિભિર્દૈવં રક્ષતિ, પોષણભેષજ્યૈશાહ તૈર્યગ્યોનમુપકરોતિ । યથાધ્યાત્મિકાનાં બાહ્યાનાં ચોપકાર્યોપકારકભાવો બુદ્ધિકૃત ઇવ દૃશ્યતે તદસ્ય કશ્ચિદ્વ્યવસ્થાપિતા સ્યાત્, કુતોઽયં વિભાગ ઇત્યન્યથાનુપપત્તેઃ ॥

'અવિભાગાદ્વૈશ્વરૂપ્યસ્ય' ઇતિ । ન વિદ્યતે વિભાગોઽસ્યેત્યવિભાગઃ । અવિભક્તાદિત્યર્થઃ । તસ્માદ્વૈશ્વરૂપ્યસ્યોપલબ્ધેરિતિ શેષઃ । ઇહ લોકેઽવિભક્તાદેકસ્માદિક્ષુદ્રવ્યાદ્રસફાણિતગુડખણ્ડશર્કરાદિવૈશ્વરૂપ્યં નાનાત્વં દૃશ્યતે,
તથૈકસ્માદ્દુગ્ધાદ્દધિમસ્તુનવનીતઘૃતાદિવૈશ્વરૂપ્યમુપલભ્યતે । એવમાધ્યાત્મિકાનાં બાહ્યાનાં ચ વૈશ્વરૂપ્યમ્ । તસ્માદેષામવિભક્તેનૈવ ભવિતવ્યમિતિ સામાન્યતોદૃષ્ટમ્ ॥

અન્યસ્ત્વાહ- 'અવિભાગે વૈશ્વરૂપ્યસ્ય' ઇતિ । અવિભાગો લયઃ, વૈશ્વરૂપ્યં જગત્ નાનારૂપત્વાત્ । પ્રલયકાલે વૈશ્વરૂપ્યં ક્વ લીયતે સ્થિત્યુત્પત્તિપ્રલયાજ્જગત ઇતિ । ન ચેશ્વરે લયનં સમ્ભવતિ, તસ્ય નિર્ગુણત્વેનાભ્યુપગમાત્ । તસ્માદન્યથાનુપપત્ત્યાસ્તિ તદેકમિતિ । તથા ચાહુઃ-
પ્રધાનાદાનુપૂર્વ્યેણ સૃષ્ટિર્લોકસ્ય સંસરઃ ।
પ્ર ॥પ્રાતિલોમ્યેન પુનસ્તત્રૈવ સઞ્ચરઃ ॥ ઇતિ ॥ ૧૫॥

કારિકા ૧૬

એષાં હેતૂનાં પ્રવર્તનાર્થમાહ-

॥ કારણમસ્ત્યવ્યક્તમ્, પ્રવર્તતે ત્રિગુણતઃ સમુદયાચ્ચ ।

પરિણામતઃ સલિલવત્, પ્રતિપ્રતિગુણાશ્રયવિશેષાત્ ॥ ૧૬ ॥ ॥

'કારણમસ્તિ' ઇત્યાદિ ॥

યદિ કારણમસ્ત્યવ્યક્તં તત્કથં પ્રવર્તત ઇત્યાહ-
'ત્રિગુણતસ્સમુદયાચ્ચ' ઇતિ । યદા પ્રકૃતિસ્થા ગુણાસ્સામ્યેન પ્રવર્તન્તે
તદા (ત્રીનેવાધિકૃત્ય પ્રવરન્તે નૈકૈકમિત્યર્થઃ । યદા વૈષમ્યેણ
પ્રવર્તન્તે તદા) કાર્યં કારણારબ્ધત્વાત્ સમુદયાત્ પ્રવર્તતે । સમન્તાદુદયો
યસ્ય ગુણસ્ય તમધિકૃત્યેત્યર્થઃ, શેષન્યક્કૃતશક્તિકત્વાત્ । યદિ
સમુદયાદવ્યક્તં પ્રવર્તતે તસ્માદુત્પન્નં તદવ્ય ॥ ।સ્માન્ન ભવતિ ॥

શુક્લેભ્યઃ કૃષ્ણેભ્યો વા તન્તુભ્યઃ શુક્લઃ કૃષ્ણો વા પટો ભવતીત્યાહ-
'પરિણામતઃ' ઇત્યાદિ । પૂર્વસ્યામવસ્થાયામવસ્થાન્તરં પરિણામઃ, તસ્માદ્ધેતોઃ
પ્રવર્તતે । યથા કણિકાયાઃ સૂક્ષ્માયા મૂલકઃ શાખાપ્રશાખાદિપ્રવૃદ્ધો
મહાન્વનસ્પતિર્વ્યક્તો ભવતિ, એવમવ્યક્તાદ્વ્યક્તં પરિણમતિ ॥

યદ્યેવમેકરૂપાદુત્પન્નસ્ય ત્રૈલોક્યસ્ય કથમનેકરૂપત્વમિત્યાહ-
'સલિલવત્પ્રતિપ્રતિગુણાશ્રયવિશેષાત્' ઇતિ । સલિલેન તુલ્યં વર્તત ઇતિ
સલિલવત્ । એકૈકં પ્રતિ ગુણાઃ પ્રતિપ્રતિગુણાઃ । ત એવાશ્રયાસ્તેષાં યો
વિશેષસ્તસ્માદ્ધેતોઃ પ્રવર્તન્તે । યથા સલિલમન્તરિક્ષાદેકરસમપિ
તદેકસ્ય કટ્વમ્લાદેર્ગુણસ્યાશ્રયભૂતસ્ય વિશેષાન્નાનારસં વર્તતે
એવમવ્યક્તમપીતિ ગુણાત્મકત્વાદેકૈકગુણાશ્રયવિશેષાન્નાનારૂપં
પ્રવર્તતે । તત્ર સત્ત્વસ્ય કૃતેરાશ્રયસ્ય વિશેષાદ્દેવભાવેન
વર્તનમ્, રજસ આશ્રયસ્ય વિશેષાન્માનુષભાવેન, તમસ આશ્રયસ્ય
વિશેષાત્તિર્યગ્યોનિભાવેનેતિ ॥ ૧૬॥

કારિકા ૧૭

એવમવ્યક્તસ્યાસ્તિત્વં પ્રવૃત્તિં ચ પ્રસાધ્ય પુરુષાસ્તિત્વં
પ્રસાધયિતુમાહ-
॥ સંઘાતપરાર્થત્વાત્ ત્રિગુણાદિવિપર્યયાદધિષ્ઠાનાત્ ।
પુરુષોઽસ્તિ ભોક્તૃભાવાત્કૈવલ્યાર્થં પ્રવૃત્તેશ્ચ ॥ ૧૭ ॥ ॥

'સંઘાતપરાર્થત્વાત્' ઇત્યાદિ । સંહન્યત ઇતિ સંઘાતઃ । સંઘાતશ્ચાસૌ
પરાર્થશ્ચેતિ સંઘાતપરાર્થઃ । સંઘાતત્વં હેતુઃ પરાર્થત્વં સાધ્યમ્ ।
ઇહ લોકે સંઘાતબાહ્યાઃ શયનાસનાદયો યે તે પરાર્થા દૃષ્ટાઃ ।
તે હિ દેવદત્તસ્ય પરસ્યાર્થં કુર્વન્તિ ન સ્વાર્થમ્ । એતેઽપ્યાધ્યાત્મિકા

મહદાદયઃ શરીરસંજ્ઞકાઃ સંઘાતાઃ, તૈઃ પરાર્થૈર્ભવિતવ્યમ્ । ન ચ પુરુષવ્યતિરિક્તોઽન્યઃ પરોઽસ્તિ, પુરુષ એવ પર ઇ ॥ન્યતોદૃષ્ટમ્ ॥

નનુ મહદાદિભૂતપર્યન્તં શરીરમેવ પુરુષો નાન્યઃ કશ્ચિદિત્યત્રાહ- 'ત્રિગુણાદિવિપર્યયાત્' ઇતિ । આદિશબ્દેનાવિવેક્યાદયઃ પઞ્ચ ધર્મા દૃશ્યન્તે । તથા હિ તદ્વિપરીતઃ પુમાનિત્યુક્તમ્ । તતશ્ચ તદ્વિપરીતત્વાત્પુંસઃ કથં મહદાદિમાત્રમેવ પુરુષઃ । તસ્માદ્વ્યતિરિક્તઃ પુરુષો યસ્યાર્થકા ઇમે સંઘાતાઃ ॥

'અધિષ્ઠાનાત્' ઇતિ । અધિતિષ્ઠત્યસ્મિન્નિત્યધિષ્ઠાનમ્ । મહદાદિભૂતપર્યન્તં શરીરમિહ લોકે યદધિષ્ઠાનં તત્પરાધિષ્ઠિતં દૃષ્ટમ્, યથા રથાદિ । દૃશ્યતે ચાધિષ્ઠાનં શરીરમ્ । તસ્માદસ્યાધિષ્ઠાત્રા ભવિતવ્યમ્ । યોઽસાવધિષ્ઠાતા સ પુરુષઃ, નાન્તઃકરણમધિષ્ઠાતૃ, તસ્યાચેતનત્વાદિતિ સામાન્યતોદૃષ્ટમ્ ॥

'ભોક્તૃભાવાત્' ઇતિ । ભોક્તૃત્વાદિત્યર્થઃ । ઇહ લોકે ભોગ્યં દૃષ્ટ્વા ભોક્તાનુમીયતે । દૃશ્યતે મહદાદિપર્યન્તં ભોગ્યમ્, તસ્માદસ્યાપિ ભોક્ત્રા ભવિતવ્યમિતિ સામાન્યતોદૃષ્ટમ્ । ન ચાન્તઃકરણં ભોક્તૃ, તસ્યાચેતનત્વાદ્ભોગ્યત્વાચ્ચ । યશ્ચ ભોક્તા સ એવ પુરુષઃ સાત્મકં જીવચ્છરીરં પ્રાણાદિમત્ત્વાત્ । અસ્મિન્ દેધે યોઽયમાત્મા સમાનજાતીયાનેકવસ્ત્વન્તરસહાયઃ, પ્રતિનિયતૈર્જન્માદિભિર્યુજ્યમાનત્વાત્ મનોવત્ ॥

'કૈવલ્યાર્થં પ્રવૃત્તેશ્ચ' ઇતિ । કૈવલ્યં મોક્ષઃ । તદન્યાર્થપ્રધાનસ્યૈષા પ્રવૃત્તિઃ । તથાહિ- પ્રધાનં બુદ્ધ્યાત્મના પરિણમતિ । બુદ્ધેશ્ચાષ્ટાદશાનિ । તેષુ ચ જ્ઞાનં કૈવલ્યમ્ । તત્ર યદિ પુરુષો ન સ્યાત્તદા તદર્થા પ્રવૃત્તિર્ન ભવેત્ । તસ્માદન્યથાનુપપત્ત્યા પુરુષોઽસ્તિ ॥

તત્ર સિદ્ધે પુંસિ વિવાદાઃ । એક એવાયં પુરુષઃ સર્વશરીરેષુ સ્થિત ઇત્યેકે । સર્વે કાય ઉપનતાનેકાત્માનસ્સાત્મકત્વાત્, યોગિશરીરવૃંદ ॥

પ્રતિશરીરમનેકઃ પુરુષ ઇત્યપરે । એક એવ પુરાણઃ પુરુષઃ, તસ્માદગ્નેસ ॥ વિષ્ફુલિઙ્ગાઃ પ્રતિશરીરં પુરુષા આબિર્ભૂતા ઇતિ વેદાન્તવાદિનઃ ॥ ૧૭॥

કારિકા ૧૮

અત્રાહ-

॥ જનનમરણકરણાનાં પ્રતિનિયમાદયુગપત્પ્રવૃત્તેશ્ચ ।
પુરુષબહુત્વં સિદ્ધં ત્રૈગુણ્યવિપર્યયાચ્ચૈવ ॥ ૧૮ ॥ ॥

'જનનમરણકરણાનામ્' ઇત્યાદિ । કરણં ચક્ષુરાદીન્દ્રિયમ્ દેહેન્દ્રિયાદેરધિષ્ઠાનસ્યોત્પત્તિવિનાશૌ । તદ્યોગાત્પુરુષઃ જનનમરણેઽપિ વ્યવસ્થાપ્યેતે । સ્વતઃ પુરુષસ્ય તે ન સમ્ભવતઃ । કુતઃ ? - નિત્યતાત્ તત્ર યદ્યેકઃ પુરુષઃ સ્યાત્તદૈકસ્મિન્ જાયમાને મ્રિયમાણે વા સર્વેષાં જનનમરણે સ્યાતામ્ । તથૈકસ્મિંશ્ચક્ષુષ્મતિ શ્રોત્રવતિ વા સર્વેઽન્ધા (બધિરા વા, પશ્યેયુઃ શ્રુણુયુર્વા । એકસ્મિન્નન્ધે) બધિરે વા તથા સ્યુઃ । ન ચૈવમ્, જનનાદીનાં પ્રતિનિયમાત્ । તસ્માદન્યથાનુપપત્ત્યા પુરુષબહુત્વં સિદ્ધમ્ ॥

'અયુગપત્પ્રવૃત્તેશ્ચ' ઇતિ । યદ્યેકઃ પુરુષઃ સ્યાત્તદૈકેનાધિષ્ઠાત્રા તિષ્ઠતિ દેહે, ધર્માધર્મયોરર્થાનર્થયોઃ સુખદુઃખયોર્વા પ્રવૃત્તે, સર્વ એવ યુગપત્પ્રવર્ત્તેરન્ । ન ચૈવમિત્યન્યથાનુપપત્તિઃ ॥

'ત્રૈગુણ્યવિપર્યયાચ્ચ' ઇતિ । ત્રય એવ ગુણાસ્ત્રૈગુણ્યમ્ । તદ્ વિપર્યયોઽન્યથાત્વમ્ । અધિષ્ઠાનસ્ય ત્રિગુણાત્મકત્વાત્તદ્યોગાત્પુરુષોઽપિ ત્રિગુણાત્મક ઇત્યુચ્યતે । તત્ર યદ્યેકઃ પુરુષઃ સ્યાત્તદૈકસ્મિન્ સાત્ત્વિકે રાજસે તામસે વા, સર્વ એવ તથાવિધાઃ સ્યુઃ । ન ચૈવમ્, ગુણાનં વિપર્યયદર્શનદિત્યન્યથાનુપપત્તિઃ ॥

પુરાણપુરુષાદગ્નેરિવ વિષ્ફુલિઙ્ગાઃ પ્રતિશરીરં પુરુષા ઇત્યસ્મિન્નપિ દર્શને પુરુષબહુત્વમસ્ત્યેવ । તેષાં પરસ્પરવિલક્ષણત્વાત્ તે પુરાણપુરુષાદભિન્ના ભિન્ના વેતિ દર્શનદ્વયમ્ । તદન્યત્ર વિવારિતત્વાદિહ ગ્રન્થગૌરવભયાન્નોપન્યસ્તમસ્માભિરિતિ ॥ ૧૮॥

કારિકા ૧૯

એવં પુરુષબહુત્વં પ્રસાદ્ધ્ય તદ્ધર્માન્ કથયિતુમાહ-

॥ તસ્માચ્ચ વિપર્યાસાત્સિદ્ધં સાક્ષિત્વમસ્ય પુરુષસ્ય ।
કૈવલ્યમ્માધ્યસ્થં દ્રષ્ટૃત્વમકર્તૃભાવશ્ચ ॥ ૧૯ ॥ ॥

'તસ્માચ્ચ વિપર્યાસાત્' ઇત્યાદિ । યઃ પ્રાગુક્તો વિપર્યયઃ- ત્રિગુણમવિવેકિ વિષયઃ - ઇત્યાદિના, તસ્માત્સાક્ષિત્વાદયો ધર્માઃ પુરુષસ્ય સિદ્ધાઃ । તત્ર નિર્ગુણસ્ય પુરુષસ્યાપ્રસવધર્મિત્વાદકર્તૃત્વમ્ । યશ્ચાકર્તા સ

ભવત્યુદાસીનઃ । સપ્તવિધં ચાસ્યૌદાસીન્યમ્ । તથા ચોક્તમ્ -
પશ્યતિ શ ૃણોતિ સર્વમ કરોતિ સ્થિતિં પ્રસઙ્ગં ચ નાપિ ।
સ્વતો ન પરતો ॥ ંઓભયતશ્ચાપ્યુદાસીનઃ ॥ ઇતિ ॥

યશ્ચોદાસીનઃ સ સાક્ષ્યપિ ભવતિ પ્રધાનસમ્બન્ધિનઃ ક્રિયાકલાપસ્ય નિર્ગુણત્વાત્ ॥

કૈવલ્યં કેવલભાવાત્ ચેતનત્વાચ્ચ દ્રષ્ટૃત્વમિતિ ॥

નનુ ચ યદ્યકર્તા તત્કથં- ભોક્તૃભાવાદસ્તિ પુરુષઃ- ? તથા ચાહુઃ-
બાલહુતાશનતરવઃ સ્વયમકૃતાનાં યથા હિ ભોક્તારઃ ।
પુરુષોઽપિ વિષયફલાનાં સ્વયમકૃતાનાં તથાપિ ભોક્તા ॥ ઇતિ ॥

ઇત્યુક્તમકર્તુરપિ ભોક્તૃત્વમસ્યેતિ ॥ ૧૯॥

કારિકા ૨૦

નનુ ચ યદ્યચેતનમવ્યક્તં કથં દેહેન્દ્રિયસંજ્ઞામધિષ્ઠાનં ધર્માધર્માદિષુ પ્રવર્ત્તતે, તસ્યાચેતનત્વાદિત્યાહ-
॥ તસ્માત્તત્સંયોગાદચેતનં ચેતનાવદિવ લિઙ્ગમ્ ।
ગુણકર્તૃત્વેઽપિ તથા કર્તેવ ભવત્યુદાસીનઃ ॥ ૨૦ ॥ ॥

'તસ્માત્તત્સંયોગાત્' ઇત્યાદિ । તેન પુરુષેણ યઃ સંયોગસ્તસ્માદચેતનં ચેતનાવદિવ ભવતિ । યથાગ્નિસંયોગાલ્લોહમણિરિત્યુચ્યતે । લિઙ્ગં મહદાદિસૂક્ષ્મપર્યન્તં વક્ષ્યતિ ॥

યદિ તદેવ ત્રિગુણાત્મકં કર્તૃ ન પુમાન્, કથં પુરુષો ગચ્છતીત્યુચ્યત ઇત્યાહ- 'ગુણકર્તૃત્વેઽપિ તથા કર્તેવ ભવત્યુદાસીનઃ' ઇતિ ।
ગુણાનાં કર્તૃત્વં ન પુરુષસ્ય । યથા પુરુષસંયોગાદચેતનં લિઙ્ગં ચેતનાવદિવ ભવતિ, તથા ગુણાત્મકલિઙ્ગસંયોગાદકર્તાપિ સન્ કર્તેવ ભવતિ । ઉદાસીનઃ । યથા સ્વામી સ્વયમયોદ્ધાપિ યૌધભૃત્યસંયોગાદ્ યોદ્ધેતિ વ્યપદિશ્યતે, તથા પુરુષોઽપ્યુપચારેણ કર્તેતિ ।
તથા ચોક્તમ્ -
પ્રવર્ત્તમાનાન્ પ્રકૃતેરિમાન્ ગુણાંસ્તમોઽભિભૂતો વિપરીતદર્શનઃ ।
અહં કરોમીત્યબુધોઽભિમન્યતે તૃણસ્ય કુબ્જીકરણેઽપ્યનીશ્વરઃ ॥

ઇતિ ॥ ૨૦॥

કારિકા ૨૧

નનુ પ્રધાનપુરુષયોઃ કિં (કર્તૃત્વં) ચૈતન્યાર્થમેવ સંયોગઃ,
કિં વાન્યાર્થમપીત્યાહ-
॥ પુરુષસ્ય દર્શનાર્થં કૈવલ્યાર્થં તથા પ્રધાનસ્ય ।
પંગ્વન્ધવદુભયોરપિ સંયોગસ્તત્કૃતઃ સર્ગઃ ॥ ૨૧ ॥ ॥

'પુરુષસ્ય' ઇત્યાદિ । પુરુષસ્યાર્થો દ્વિવિધઃ, વિષયોપભોગઃ કૈવલ્યં ચ । તદુભયં પ્રધાનેન સમ્પાદ્યમ્ । વિષયોપભોગશ્ચ પ્રધાનવિભૂતિમન્તરેણ ન સમ્ભવતિ, ઇતિ દર્શનાર્થં પુરુષઃ પ્રધાનેન સંયુજ્યતે । માનં સ્વાં વિભૂતિં દર્શયિતુમસમર્થાત્પુરુષેણ સંયુજ્યતે (?) । દૃષ્ટ્વા સ સર્વાં વિભૂતિમનુભૂય વિરસત્વાદ્ વિરક્તઃ પુરુષઃ પ્રધાનેન ત્યજ્યતે । ત્યક્તસ્ય કૈવલ્યમિત્યતો દર્શનાર્થં કૈવલ્યાર્થં ચ દ્વયોરપિ સંયોગો મત્સ્યોદકવદુદુમ્બરમશકશ્ચ ॥

'પંગ્વન્ધવત્' ઇતિ । દૃષ્ટાન્તઃ । પઙ્ગુઃ સચક્ષુઃ પશ્યતિ પન્થાનં ન સંચરતિ, અન્ધોઽપિ સંચરતિ ન પશ્યતિ પન્થાનમ્ । તયોઃ સ્વાર્થભ્રષ્ટયોર્ગ્રામપ્રાપ્ત્યર્થઃ સમ્બન્ધો ભૂતઃ । તત્ર પઙ્ગુરન્ધસ્કન્ધમારુહ્ય ગતિમાન્, અન્ધોઽપિ દ્રષ્ટ્રધિષ્ઠાનાદ્દૃષ્ટિમાન્ જાતઃ । ગ્રામપ્રાપ્તયોશ્ચ તયોર્વિયોગઃ । એવં પુરુષો નિષ્ક્રિયઃ પ્રધાનેન સંયુજ્ય તદ્વિભૂતિદર્શનાય દેવાદિષુ સંચરતિ । પ્રધાનં નિશ્ચેતનમપિ પુરુષાધિષ્ઠાનાચ્ચેતનાવદિવ દ્વયમપિ સમ્પાદયતિ । તસ્માત્પંગ્વન્ધવદુભયોરપિ સંયોગઃ ॥

નનુ ચ સંયોગમાત્રેણ કથં દર્શનં કૈવલ્યં ચેત્યાહ- 'તત્કૃતઃ સર્ગઃ' ઇતિ । સંયોગકૃતો મહદાદિગ્રામોત્પાદ ઇત્યર્થઃ ॥ ૨૧॥

કારિકા ૨૨

તમેવ દર્શયન્નાહ-
॥ પ્રકૃતેર્મહાંસ્તતોઽહઙ્કારસ્તસ્માદ્ગણશ્ચ ષોડશકઃ ।
તસ્માદપિ ષોડશકાત્પઞ્ચભ્યઃ પઞ્ચ ભૂતાનિ ॥ ૨૨ ॥ ॥

'પ્રકૃતેર્મહાન્' ઇત્યાદિ । પ્રકૃતિઃ પ્રધાનં કારણમવ્યક્તં ગુણસામ્યં તમોબહુલમવ્યાકૃતમિતિ પ્રકૃતિપર્યાયાઃ । તતો મહાનુત્પદ્યતે સ તુ તમોબહુલઃ । મહાન્ બુદ્ધિર્મતિઃ પ્રત્યય ઉપલબ્ધિરિતિ બુદ્ધિપર્યાયાઃ । તતોઽહઙ્કાર ઉત્પદ્યતે । સ તુ રજસ્તમોબહુલઃ । અહઙ્કારઃ

સુપર્ણપણિ(!)સ્તત્પુરુષ ઇત્યહઙ્કારપર્યાયાઃ ॥

'તસ્માદ્ગણશ્ચ ષોડશકઃ' ઇતિ । તસ્માદહઙ્કારાત્ ષોડશકો ગણ ઉત્પદ્યતે । એકાદશેન્દ્રિયાણિ પઞ્ચ તન્માત્રાણીત્યર્થઃ । તાનિ હૃષીકાણીન્દ્રિયાણીતિ પર્યાયાઃ । સૂક્ષ્મા અતિશયા અણવઃ (વિષા) ઇતિ તન્માત્રપર્યાયાઃ ॥

'તસ્માદપિ ષોડશકાત્ પઞ્ચભ્યઃ પઞ્ચ ભૂતાનિ' ઇતિ । ષોડશાદ્ ગણાદ્યાનિ પઞ્ચ તન્માત્રાણિ તેભ્ય એકોત્તરવૃદ્ધ્યા પઞ્ચ મહાભૂતાનિ ભવન્તિ । તત્ર શબ્દતન્માત્રાદાકાશમેકગુણમ્ । શબ્દતન્માત્રપ્રતિસંહિતાત્ સ્પર્શતન્માત્રાદ્દ્વિગુણો વાયુઃ । તાભ્યાં પ્રતિસંહિતાદ્રૂપતન્માત્રાત્ ત્રિગુણં તેજઃ । તૈઃ પ્રતિસંહિતાદ્રસતન્માત્રાત્ ચતુર્ગુણા આપઃ । ચતુર્ભિઃ પ્રતિસંહિતાદ્ગન્ધતન્માત્રાત્ પઞ્ચગુણા પૃથિવીતિ । એતૈરેકાદશાદયઃ સ્થૂલા વિશેષા ઉચ્યન્તે, યેષ્વવસિતાનિ ચતુર્વિંશતિતત્ત્વાનિ ॥ ૨૨॥

કારિકા ૨૩

બુદ્ધેર્લક્ષણમાહ-
॥ અધ્યવસાયો બુદ્ધિર્ધર્મો જ્ઞાનં વિરાગ ઐશ્વર્યમ્ ।
સાત્ત્વિકમેતદ્રૂપં તામસમસ્માદ્વિપર્યસ્તમ્ ॥ ૨૩ ॥ ॥

'અધ્યવસાયઃ' ઇત્યાદિ । શબ્દાદિષુ વિષયેઽધ્યવસાયશબ્દોઽયં યાવત્ ગન્ધોઽયમિતિ સુબુદ્ધેર્લક્ષણમ્ (?) । તસ્યાશ્ચાષ્ટૌ રૂપાણિ ॥

'ધર્મો જ્ઞાનં વિરાગ ઐશ્વર્યમ્' ઇતિ । તત્ર
યોઽયમનિવિષયમનુષ્ઠાનાત્મકોઽધવસાયસ્સ ધર્મઃ ।
યમાઃ પઞ્ચ નિયમાશ્ચ । યથોક્તં સાંખ્યપ્રવચને
'અહિંસાસત્યાસ્તેયબ્રહ્મચર્યાપરિગ્રહા યમાઃ' ।
'શૌચસન્તોષતપસ્સ્વાધ્યાયેશ્વરપ્રણિધાનાનિ નિયમાઃ' ઇતિ ।
તત્ર સન્તોષસ્સનિહિતસાધનાભ્યાશાદધિકસ્યાનુપાદિત્સા । તપો જિઘત્સાપિપાસાશીતોષ્ણસ્થાનસાધનાજયઃ કાષ્ઠમૌનાકારમૌને, વ્રતાનિ ચ કૃચ્છ્રચાન્દ્રાયણાદીનિ । સ્વાધ્યાયો મોક્ષશાસ્ત્રાધ્યયનં પ્રણવજપો વા । ઈશ્વરપ્રણિધાનં વિશિષ્ટદેવતારાધનમ્ । અસંસારિભિસ્તુલ્યવૃત્તિત્વાદિતિ । તદ્વિપરીતાનુષ્ઠાનમધર્મઃ । પઞ્ચવિંશતિતત્ત્વાનાં સ્વસંજ્ઞાલાક્ષણ્યકત્વપ્રયોજનાવધારણં જ્ઞાનમ્, ગુણપુરુષાન્તરજ્ઞાનમ્ । શેષમજ્ઞાનમ્ । વિષયશરીરેન્દ્રિયેભ્યો દોષદર્શનાદ્વૈમુખ્યં વિરાગઃ । તેષ્વભિલાષો રાગઃ । ઐશ્વર્યમષ્ટગુણમ્- અણિમા, મહિમા, લઘિમા, પ્રાપ્તિઃ,

પ્રાકામ્યમ્, ઈશિત્વં, વશિત્વમ્, યત્રકામાવસાયિત્વં ચેતિ । તત્રાણિમાણુત્વમ્, યેન ગુણેન સૂક્ષ્મો ભૂત્વા વિચરતિ । કાર્યે કારણોપચારાદણિમેત્યુચ્યતે । ઉત્તરત્રાપ્યેવં યોજ્યમ્ । લઘિમા લઘુત્વમ્, યેન વાયુવલ્લઘુતરો ભવતિ । મહિમા મહત્ત્વમ્, યેન ભુવનેષુ ધર્માદિપ્રાપ્તિઃ, યેન ગુણેનેષિતસ્ય પ્રાપણમ્ । પ્રાકામ્યં પ્રચુરકામિતા યેનૈકમનેકં પ્રાકામ્યતેઽનેકં ચૈકમ્ । ઈશિત્વં પ્રભુતા (યેન સ્થાવરાદીનિ ભૂતાનિ સન્દેશકારીણિ ભવન્તિ । વશિત્વં વશિતા) યેન સ્વતન્ત્રશ્ચરતિ । યત્રકામાવશાયિત્વં (કામેનેચ્છયાવશેતું શીલં યસ્ય સ યત્રકામાવશાયી । તસ્ય ભાવઃ યત્રકામાવશાયિત્વમ્) । અનેકાર્થત્વાદ્ધાતૂનાં 'શી' તિષ્ઠતૌ વર્ત્તતે । યેન ગુણેન દિવ્યન્તરિક્ષે ભૂમૌ વાવસ્થાયિત્વમિત્યર્થઃ ।
'સાત્ત્વિકમેતદ્રૂપમ્' ઇતિ । સત્ત્વતમોબહુલત્વાત્ । બુદ્ધેર્યદા સત્ત્વમુત્કટં ભવતિ તદૈતચ્ચતુષ્ટયં ભવતીત્યર્થઃ ।
'તામસમસ્માદ્વિપર્યસ્તમ્' ઇતિ । ઉત્કટલક્ષણાત્ ધર્માદિચતુષ્ટયાદ્વિપરીતં તમસ્યુદ્રિક્તે ભવતીત્યર્થઃ । અધર્મોઽજ્ઞાનમવૈરાગ્યમનૈશ્વર્યં ચેતિ ॥ ૨૩ ॥

કારિકા ૨૪

અહઙ્કારલક્ષણમાહ-
॥ અભિમાનોઽહઙ્કારઃ, તસ્માદ્દ્વિવિધઃ પ્રવર્ત્તતે સર્ગઃ ।
એકાદશશ્ચ ગણસ્તન્માત્રપઞ્ચકશ્ચૈવ ॥ ૨૪ ॥ ॥

'અભિમાનઃ' ઇત્યાદિ । અભિમતિરભિમાનઃ । રૂપાદિષુ વિષયેષ્વભિમાનો રૂપવાનહમ્, મમૈતે વિષયાઃ, ઇત્યહ્યઙ્કારલક્ષણમ્ ॥

તસ્માદભિમાનલક્ષણાદહઙ્કારાત્ 'દ્વિવિધઃ પ્રવર્ત્તતે સર્ગઃ' ઇતિ । સૃજ્યત ઇતિ સર્ગઃ ॥

તમેવ દ્વિવિધં દર્શયિતુમાહ- 'એકાદશકશ્ચ ગણઃ' ઇતિ । એકાદશ પરિમાણમસ્યેત્યેકાદશઃ શ્રોત્રાદિર્ગણઃ ॥

'તન્માત્રાપઞ્ચકં ચ' ઇતિ । તન્માત્રશબ્દાદિસ્વરૂપમાત્ર ઇત્યર્થઃ । તન્માત્રાણિ શબ્દસ્પર્શરૂપરસગન્ધાઃ । માત્રાગ્રહણં ભૂતસંશ્લેષનિવૃત્ત્યર્થમ્ । ભૂતેષ્વપિ શબ્દાદિસમ્ભવાત્ ॥ ૨૪॥

કારિકા ૨૫

સ ચાહઙ્કારસ્ત્રિવિધ ઇતિ દર્શયન્નાહ-
॥ સાત્ત્વિક એકાદશકઃ પ્રવર્ત્તતે વૈકૃતાદહઙ્કારાત્ ।
ભૂતાદેસ્તન્માત્રઃ સ તામસઃ, તૈજસાદુભયમ્ ॥ ૨૫ ॥ ॥

'સાત્ત્વિકઃ' ઇત્યાદિ । યદા સત્ત્વમુદ્રિક્તં તદાહઙ્કારો વૈકૃતાભિમાનો ભવતિ, રજશ્ચોદ્રિક્તં તૈજસઃ, તમશ્ચોદ્રિક્તં ભૂતાદિરિતિ । તત્ર વૈકૃતાદેકાદશકો ગણઃ પ્રવર્ત્તતે । સ ચ સાત્ત્વિકઃ સત્ત્વબહુલઃ, સ્વવિષયગ્રહણત્વાત્ ॥

ભૂતાદેસ્તામસાદહઙ્કારાત્તન્માત્રઃ સ તામસઃ, તમોબહુલત્વાત્ । તતસ્તામસાત્તન્માત્રાત્ ગણાત્ તામસો ભૂતગણઃ પ્રવર્ત્તતે ॥

('તૈજસાદુભયમ્' ઇતિ । એતદાશયઃ- પઞ્ચકઞ્ચૈતદુભયમપિ પ્રવર્ત્તતે) । આદિકાલ ઉભયત્રાપ્યસ્ય સહાયત્વાત્ । વૈકૃતભૂતાદિ દ્વાવપિ પ્રકાશસ્થિતિશીલત્વાત્ ન ક્રિયાશીલે । તતસ્તૈજસમહઙ્કારં ક્રિયાશીલં સહાયમપેક્ષ્યૈકાદશકં પઞ્ચકં ચ મલાજનયત (?) ઇતિ ॥ ૨૫॥

કારિકા ૨૬

કઃ પુનરેકાદશ ઇત્યાહ-
॥ બુદ્ધીન્દ્રિયાણિ ચક્ષુઃશ્રોત્રઘ્રાણરસનત્વગાખ્યાનિ ।
વાક્પાણિપાદપાયૂપસ્થાન્ કર્મેન્દ્રિયાણ્યાહુઃ ॥ ૨૬ ॥ ॥

'બુદ્ધીન્દ્રિયાણિ' ઇત્યાદિ । દ્વિવિધમિન્દ્રિયમ્ । તત્ર ચક્ષુર્યેન દૃશ્યતે । શ્રોત્રં યેન શ્રૂયતે । ત્વગ્યયા સ્પૃશ્યતે । રસનં યેન રસ્યતે । નાસિકા યયા ઘ્રાયતે । તા આખ્યા યેષામિન્દ્રિયાણામિતિ શબ્દપ્રધાનો નિર્દેશઃ । તાનિ ચક્ષુઃશ્રોત્રત્વગ્રસનાનાસિકાખ્યાનિ પઞ્ચ । બુદ્ધિપૂર્વકપર્યાલોચનમિતિ બુદ્ધીન્દ્રિયાણ્યાહુઃ સાંખ્યાચાર્યાઃ । શબ્દવશાદત્રાક્રમઃ કૃતઃ । ક્રમસ્તુ શ્રોત્રત્વક્ચક્ષુરિતિ ॥

'વાક્પાણિપાદપાયૂપસ્થાન્' ઇતિ । કર્મેન્દ્રિયાણિ કર્માભિનિર્વર્તનાત્ । અસ્માદેવ પ્રયોગાદુપસ્થશબ્દઃ પુંલિઙ્ગોઽપ્યસ્તીતિ જ્ઞાયતે । સ ચ સ્ત્રૈણઃ પૌરુષેયશ્ચ । તત્ર વાગિન્દ્રિયં કણ્ઠસ્થમ્ । અન્યાનિ પ્રસિદ્ધાન્યેવ ॥ ૨૬॥

કારિકા ૨૭

એકાદશકમિન્દ્રિયં દર્શયન્નાહ-
॥ ઉભયાત્મકમત્ર મનઃ, સઙ્કલ્પકમિન્દ્રિયં ચ સાધર્મ્યાત્ ।

ગુણપરિણામવિશેષાન્નાનાત્વં બાહ્યભેદાશ્ચ ॥ ૨૭ ॥ ॥

'ઉભયાત્મકમત્ર મનઃ' ઇત્યાદિ । અત્રેત્યસ્મિન્નિન્દ્રિયવશે મન ઉભયાત્મકમુભયસ્વભાવમ્ । બુદ્ધીન્દ્રિયાણાં કર્મેન્દ્રિયાણાં ચ સ્વસ્વવિષયગ્રહણકાલે બુદ્ધીન્દ્રિયં કર્મેન્દ્રિયં ચેત્યર્થઃ । ઉભયત્રાપ્યસ્ય વ્યાપારાદિતિ લક્ષણં તદિત્યાહ- સઙ્કલ્પયતીતિ સઙ્કલ્પકમ્, ઇદં નેદમિતિ ॥

કથમિન્દ્રિયમિત્યાહ- 'ઇન્દ્રિયં ચ સાધર્મ્યાત્' ઇત્યાદિ । ઇન્દ્રિયૈસ્તુલ્યત્વાદિત્યર્થઃ । યથાન્યદિન્દ્રલિઙ્ગં તથા મનોઽપીત્યર્થઃ ॥

તત્રૈકસ્માદહઙ્કારાદુત્પન્નાનાં કથં સ્વરૂપભેદઃ ? । યચ્છ્રોત્રાદિબુદ્ધીન્દ્રિયમ્, તત્ પ્રતિનિયતવિષયં નેતરવિષયમપિ । યદ્વાગાદિ કર્મેન્દ્રિયં તત્ પ્રતિનિયતકર્મ, નેતરકર્માપિ । મનશ્ચોભયાત્મકમ્, નૈકાત્મકમિત્યાહ- 'ગુણપરિણામવિશેષાન્નાનાત્વમ્' ઇતિ । અહઙ્કારસ્થા યે ગુણાઃ સત્ત્વાદયસ્તેષામન્યોઽન્યાભિભવાશ્રયા (દ્વિદ્વારેણ યઃ પરિણામવિશેષસ્તત એવૈષાં નાનાત્વમ્ । ત એવ હિ ગુણાઃ પરિ)ણામવિશિષ્ટા ઇન્દ્રિયવ્યપદેશભાજો નાનાવિષયા ભવન્તિ । કથં દેશનિયમો વૃત્તિનિયમશ્ચ ? તત્ર ત્વગિન્દ્રિયં સર્વશરીરસ્થિતબાહ્યાભ્યન્તરવૃત્તિ, ચક્ષુઃશ્રોત્રઘ્રાણરસનાનિ શિરસિ બહિઃ પૃથક્ પૃથગવસ્થિતાનિ બાહ્યવૃત્તીનિ । વાગાસ્યે સ્થિતા । પાણ્યાદયશ્ચ બાહોરધસ્તાત્ પૃથક્ પૃથગવસ્થિતા બહિઃકર્મવિષયાઃ ॥

ઇત્યતાહ- 'બાહ્યભેદાશ્ચ' ઇતિ । યે ચાન્યે વિષયભેદા દેશનિયમવૃતિનિયમાભ્યાં તેઽપિ ગુણપરિણામવિશેષાદેવ । નાત્રાન્તરા કારણમસ્તિ ॥ ૨૭॥

કારિકા ૨૮

એષામિન્દ્રિયાણાં કસ્ય કા વૃત્તિરિત્યાહ-
॥ શબ્દાદિષુ પઞ્ચાનામાલોચનમાત્રમિષ્યતે વૃત્તિઃ ।
વચનાદાનવિહરણોત્સર્ગાનન્દાશ્ચ પઞ્ચાનામ્ ॥ ૨૮ ॥ ॥

'શબ્દાદિષુ' ઇત્યાદિ । આદિશબ્દેન શબ્દસ્પર્શરૂપરસગન્ધાઃ । તેષુ યથાક્રમં પઞ્ચાનાં શ્રોત્રાદીનાં બુદ્ધીન્દ્રિયાણામાલોચનમાત્રં વૃત્તિરિષ્યતે સાંખ્યાચાર્યૈઃ । શ્રોત્રાદીનિ હિ વિષયસ્ય પ્રકાશનમાત્રં કુર્વન્તિ, નિશ્ચયં તુ બુદ્ધિઃ । તથા હિ બુદ્ધ્યવસિતમર્થં

પુરુષઃ ચેતયત ઇતિ સિદ્ધાન્તઃ । કર્મેન્દ્રિયાણામપિ વાગાદીનાં યથાક્રમં વસનાદાનાદીનિ વૃત્તયઃ કર્માણિ । તત્ર વાગિન્દ્રિયસ્ય નાનાવિધવર્ણોચ્ચારણં કર્મ, આદેયસ્યાદાનં પાણ્યોઃ, વિહરણં દેશાન્તરગમનં પાદયોઃ, ઉત્સર્ગ આહારમલસ્યોત્સર્જનં પાયોઃ, આનન્દનમાનદો હ્લાદઃ શુક્રવિસૃષ્ટિસંસૃષ્ટિસુખં તદુપસ્થેન્દ્રિયવૃત્તિઃ ॥ ૨૮॥

કારિકા ૨૯

બુદ્ધ્યહઙ્કારમનસાં કા વૃત્તિરિત્યાહ-
॥ સ્વાલક્ષણ્યં વૃત્તિસ્ત્રયસ્ય સૈષા ભવત્યસામાન્યા ।
સામાન્યકરણવૃતિઃ પ્રાણાદ્યા વાયવઃ પઞ્ચ ॥ ૨૯ ॥ ॥

'સ્વાલક્ષણ્યં વૃત્તિઃ' ઇત્યાદિ । સ્વાત્મીયં લક્ષણં યસ્ય તત્ સ્વલક્ષણમ્ । તસ્ય ભાવઃ સ્વાલક્ષણ્યમ્ । તદેવ વૃત્તિઃ ॥

'ત્રયસ્ય' ઇતિ । બુદ્ધ્યહઙ્કારમનસામિત્યર્થઃ । અધ્યવસાયો બુદ્ધેઃ, અભિમાનોઽહઙ્કારસ્ય, સઙ્કલ્પો મનસઃ । ત એવાધ્યવસાયાભિમાનસઙ્કલ્પાસ્ત્રયસ્ય વૃત્તિઃ । એષાં ચ બુદ્ધ્યાદીનાં ત્રયોદશાનાં ચતુર્વિધા વૃત્તિઃ, અસામાન્યાયુગપત્ક્રમશ્ચેતિ (?)॥

તત્ર સામાન્યાં દર્શયિતુમાહ- 'સૈષા' ઇતિ । યેયમુક્તા વૃત્તિઃ સૈષા ભવત્યસામાન્યા । યા યસ્ય સા તસ્યૈવ નાન્યેષામપીત્યર્થઃ । શ્રોત્રસ્ય યચ્છબ્દપ્રકાશનં તચ્છ્રોત્રસ્યૈવ, નાન્યેષાં ત્વગાદીનાં દ્વાદશાનામ્ । એવં સર્વત્ર યોજ્યમ્ ॥

સામાન્યામાહ- 'સામાન્યકરણવૃત્તિઃ' ઇતિ સામાન્યા ચાસૌ કરણવૃત્તિશ્ચેતિ સામાન્યકરણવૃત્તિઃ ॥

'પ્રાણાદ્યા વાયવઃ પઞ્ચ' ઇતિ । પ્રાણા આદ્યા યેષાં વાયૂનાં તે પ્રાણાદ્યાઃ । પ્રાણાપાનવ્યાનોદાનસમાના ઇતિ પઞ્ચ વાયવઃ । તત્ર પ્રાણો યો મુખનાસિકાભ્યાં નિર્ગચ્છતિ । યો નાભેરધઃ સ્થિતઃ સોઽપાનઃ । યેન કાયેઽગ્નિર્દીપિત આહારં ચ પચતિ સ સમાનઃ । યો નાભિદેશાદુદ્ધતશિરોગતિર્નાદં જનયતિ સ ઉદાનઃ । યઃ સર્વશરીરં વ્યાપ્ય સ્થિતં સ વ્યાનઃ । એતે ત્રયોદશાનામપિ કરણાનાં સામાન્યવૃત્તિઃ ॥ ૨૯॥

કારિકા ૩૦

કરણપ્રભાવિકત્વાદ્વાયૂનાં યુગપત્ક્રમશો વૃત્તિમાહ-

॥ યુગપચ્ચતુષ્ટયસ્ય તુ વૃત્તિઃ ક્રમશશ્ચ નિર્દિષ્ટા ।
દૃષ્ટે તથાપ્યદૃષ્ટે ત્રયસ્ય તત્પૂર્વિકા વૃત્તિઃ ॥ ૩૦ ॥ ॥

'યુગપત્' ઇત્યાદિ । 'ચતુષ્ટયસ્ય તુ' ઇતિ । તુશબ્દો વિશેષણાર્થઃ । બુદ્ધિરહઙ્કારો મનશ્ચક્ષુરિત્યેતસ્ય ચતુષ્ટયસ્યૈકસ્મિન્ રૂપે યુગપદ્વૃત્તિઃ । યથાન્ધકારે વિદ્યુત્સમ્પાતે કૃષ્ણસર્પસન્દર્શને યુગપદાલોચનાધ્યવસાયાભિમાનસઙ્કલ્પનાનિ ભવન્તિ । તથા હિ ચક્ષુષાલોચિતં બુદ્ધ્યાધ્યવસિતમહઙ્કારેણાત્મીકૃતં મનસા સઙ્કલ્પિતમિતિ ॥

'ક્રમશશ્ચ તસ્ય' ઇતિ । ચતુષ્ટસ્યસ્ય ક્રમેણ કદાચિદ્વૃત્તિરિષ્ટા । મન્દપ્રકાશે સ્થાણુપુરુષોચિતામૂર્ધ્વતાં દૃષ્ટવતઃ કિં સ્થાણુઃ પુરુષ ઇતિ વિકલ્પઃ । તત્રાકુઞ્ચપનપ્રસારણાત્ પુરુષ ઇત્યધ્યવસાયઃ । તત આત્મીકરણાદભિમાન ઇતિ ॥

યેય(મુભય)થાવૃત્તિઃ સા કસ્મિન્ વિષય ઇત્યાહ - 'દૃષ્ટે' ઇતિ । અદૃષ્ટે તર્હ નાસ્તીત્યાહ - 'તથાપ્યદૃષ્ટે' ઇતિ । તથા ॥।ષ્ટે દૃષ્ટેઽપિ વૃત્તિઃ ॥

કિન્તુ ન ચતુષ્ટયસ્ય તર્હીત્યાહ- 'ત્રયસ્ય' ઇતિ । બુદ્ધ્યહઙ્કારમનસામિત્યર્થઃ । તત્રાપિ તત્પૂર્વિકા શ્રોત્રાદિપૂર્વિકેત્યર્થઃ । યથા સ્મર્તવ્યમનુસ્મરતઃ સઙ્કલ્પાભિમાનાધ્યવસાયા ભવન્તિ ॥ ૩૦॥

કારિકા ૩૧

અથ યદેતચ્ચતુષ્ટયં તત્કિં યુગપત્ પરસ્પરસવ્યપેક્ષં સ્વાં સ્વાં વૃતિં પ્રતિપદ્યતે કિં વા નિરપેક્ષમિત્યાહ-
॥ સ્વાં સ્વાં પ્રતિપદ્યન્તે પરસ્પરાકૂતહૈતુકીં વૃત્તિમ્ ।
પુરુષાર્થ એવ હેતુર્ન કેનચિત્કાર્યતે કરણમ્ ॥ ૩૧ ॥ ॥

'સ્વાં સ્વામ્' ઇત્યાદિ । આત્મીયાત્મીયાં વૃત્તિમ્ ॥

'પરસ્પરાકૂતહૈતુકીમ્' ઇતિ । પરસ્પરસ્ય યદાકૂતં સ્વવૃત્તિભોગસ્તદેવ હેતુઃ । તત્ર ભૂતાં પરસ્પરાકૂતહૈતુકીં વૃત્તિં ચત્વારિ કરણાનિ પ્રતિપદ્યન્તે । તત્ર ચક્ષુર્બુદ્ધ્યાદિત્રયસ્યાકૂતં જ્ઞાત્વા પ્રકાશનં પ્રતિપદ્યતે । એવં બુદ્ધિરહઙ્કારો મનશ્ચ ત્રયાણામાકૂતં જ્ઞાત્વાઽધ્યવસાયમભિમાનં સઙ્કલ્પનં ચ પ્રતિપદ્યન્તે ।

ક્રમશશ્ચ પરસ્પરાકૂતહૈતુકીમ્ । કિન્તુ પૂર્વપૂર્વહૈતુકી દ્રષ્ટવ્યા ।
યથા કસ્યચિદુપનિમન્ત્રણં શ્રુતવતઃ શ્રોત્રવૃત્તિં જ્ઞાત્વા,
બુદ્ધિર્ગમનાયાધ્યવસિતા । તદ્વૃત્તિં જ્ઞાત્વાઽહઙ્કારો મોદકાનહં
ભક્ષયિષ્યામીતિ મન્યતે । તદ્વૃત્તિં જ્ઞાત્વા મનઃ, પ્રચુરં ઘૃતં
પ્રાપયિષ્યામીતિ કિં સ્તોકમિતિ, સઙ્કલ્પયતીતિ । એવં બાહ્યાન્યપિ કરણાનિ
સ્વાં સ્વાં વૃત્તિં પરસ્પરાકૂતહૈતુકીં પ્રતિપદ્યન્તે ॥

એતાનિ કિમાત્માર્થં સ્વાં સ્વાં વૃત્તિં પ્રતિપદ્યન્તે, કિમન્યાર્થમિત્યાહ-
'પુરુષાર્થ એવ હેતુઃ' ઇતિ । પુરુષસ્યાર્થો વિષયોપભોગઃ કૈવલ્યં ચ,
સ વૃત્તિહેતુઃ ॥

નન્વીશ્વરઃ કર્તા જગતઃ, સ એવ બુદ્ધ્યાદિકલાપં સૃષ્ટવાન્ યેન
પુરુષસ્યાર્થઃ સમ્પદ્યતે । તથા ચોક્તમ્-
'ઈશ્વરપ્રેરિતો ગચ્છેત્સ્વર્ગં વા શ્વભ્રમેવ વા' । ઇતિ
તત્રાહ - 'ન કેનચિત્કાર્યતે કરણમ્' ઇતિ । પ્રધાનવ્યતિરેકેણ ન
કશ્ચિદ્બુદ્ધ્યાદિકરણં સ્વાં સ્વાં વૃત્તિં કારયતીત્યર્થઃ । યદિ કર્તા સ્યાત્,
કિમિતિ પ્રકૃતિમપેક્ષતે । નાપિ સેશ્વરવાદિના પ્રકૃતિરભ્યુપગતૈવ,
નિશ્ચેતનત્વાત્ પ્રકૃતેઃ સચેતનોઽધિષ્ઠાતા કર્તાઽપરો ગવેષ્યત ઇતિ
ચેત્, પુરુષ એવાધિષ્ઠાતા । અચેતના પ્રકૃતિઃ । એતદુક્તમેવ પ્રાક્ ॥ ૩૧॥

કારિકા ૩૨

કતિવિધમન્તઃકરણમિત્યાહ-
॥ કરણં ત્રયોદશવિધમ્, તદાહરણધારણપ્રકાશકરમ્ ।
કાર્યં ચ તસ્ય દશધા, હાર્યં ધાર્યં પ્રકાશ્યં ચ ॥ ૩૨ ॥ ॥

'કરણં ત્રયોદશવિધમ્' ઇત્યાદિ । પઞ્ચ બુદ્ધીન્દ્રિયાણિ, પઞ્ચ
કર્મેન્દ્રિયાણિ, બુદ્ધ્યહઙ્કારમનાંસિ ચ ત્રીણિ । એતત્ ત્રયોદશવિધમ્ ।
કરણં કરોતીતિ । 'કૃત્યલ્યુટો બહુલમ્' ઇતિ કર્તરિ લ્યુટ્ ॥

તત્ર કસ્ય કા ક્રિયા યદપેક્ષયા કરણમિત્યાહ-
'તદાહરણધારણપ્રકાશકરમ્' । ઇતિ તત્કરણમાહરણાદીનિ કરોતીતિ ।
તત્ર કર્મેન્દ્રિયાણ્યાહરણં કુર્વન્તિ, બુદ્ધ્યહઙ્કારમનાંસિ ધારણમ્,
બુદ્ધીન્દ્રિયાણિ પ્રકાશમિતિ ॥

કિં તત્કાર્યં યસ્યાહરણં કુર્વન્તીત્યાહ- 'કાર્યમ્' ઇતિ । તસ્ય
કરણસ્ય દશવિધં કાર્યમ્ । તત્ર શબ્દસ્પર્શરૂપરસગન્ધાઃ પઞ્ચ

વચનાદાનવિહરણોત્સર્ગાનન્દાઃ પઞ્ચેતિ દશધા । પૂર્વે દ્વિવિધાઃ- સૂક્ષ્માસ્તન્માત્રલક્ષણાઃ સુખૈકસ્વભાવત્વાદ્દિવ્યાઃ, સ્થૂલા આકાશાદયઃ સુખદુઃખમોહત્મકત્વાદદિવ્યા ઇતિ । એતત્કાર્યં બુદ્ધીન્દ્રિયાણાં પ્રકાશ્યમ્ । વાગાદીનામુક્ત્યાદાનાદિકર્મકર્તૃત્વાત્ કાર્યમ્ (?) । તત્ર વાચા શબ્દસ્ય, પાણિભ્યામાદેયસ્યાહ્રિયમાણત્વાદુભયમપ્યાહાર્યમ્ ॥ વિહાર્યં વિહરણસ્થાનમ્, પૂર્વાવયવન્યાસેનોત્તરાવયવાક્રમણેન ચ પાદાભ્યામાહ્રિયમાણત્વાદાહાર્યમ્ । અન્યથા કથમુત્સર્ગાનન્દૌ સ્યાતામ્ । ઉભયમપિ કર્મેન્દ્રિયાવિષયમ્ । બુદ્ધ્યહઙ્કારમનસાં ધાર્યમ્, તૈરન્તઃ સ્વવૃત્ત્યાવધાર્યમાણત્વાત્ ॥ ૩૨॥

કારિકા ૩૩

તદેવ ત્રયોદશવિધં કરણં બાહ્યાન્તરભેદાદ્વિવિધમિતિ દર્શયન્નાહ-
॥ અન્તઃકરણં ત્રિવિધં દશધા બાહ્યં ત્રયસ્ય વિષયાખ્યમ્ ।
સામ્પ્રતકાલં બાહ્યં ત્રિકાલમાભ્યન્તરં કરણમ્ ॥ ૩૩ ॥ ॥

'અન્તઃકરણમ્' ઇત્યાદિ । કરણં દ્વિવિધમ્- બાહ્યમાભ્યન્તરં ચ । તત્ર શરીરસ્યાન્તઃસ્થિતત્વાદન્તઃકરણં ત્રિવિધમ્- બુદ્ધિરહઙ્કારોમનશ્ચેતિ ॥

'દશધા બાહ્યમ્' ઇતિ । દશપ્રકારમ્ । પઞ્ચ બુદ્ધીન્દ્રિયાણિ, પઞ્ચ કર્મેન્દિયાણિ । તદ્બુદ્ધિર્ભવતિ ॥

તદ્બાહ્યં 'ત્રયસ્ય વિષયાખ્યમ્' ઇતિ । ત્ર્યવયવસ્યાન્તઃકરણસ્ય બાહ્યં વિષય ઇત્યાખ્યાયતે, તદ્દ્વારેણ વિષયાવગાહનાત્ । તેનાન્તઃકરણસ્ય દ્વિવિધો વિષયઃ- દ્વારં ભોગ્યં ચેતિ । ચતુષ્ટયસ્ય દૃષ્ટેર્વર્તમાને ત્રયસ્યાદૃષ્ટે વૃત્તિરુક્તા ॥

તત્રાતીતાનાગતયોરપિ વિષયયોઃ કિં વૃત્તિરસ્તિ, નેત્યાહ- 'સામ્પ્રતકાલં બાહ્યમ્' ઇતિ । કલ્પ્યત ઇતિ કાલઃ વિષય એવાતીતોઽનાગતો વર્તમાનોશ્ચોચ્યતે । ન તદ્વ્યતિરેકેણ કાલોઽસ્તિ । મા ભૂત્ ષડ્વિંશતિતત્ત્વપ્રસઙ્ગ ઇતિ । તત્ર સામ્પ્રતો વર્તમાનઃ કાલો યસ્ય બાહ્યસ્ય તદ્ધિ બાહ્યમ્ । શ્રોત્રાદિ વર્તમાનમેવ શબ્દાદિકં પ્રકાશયતિ, નાતીતાનાગતે । વાગાદિ ચ વર્તમાનમેવોક્ત્યાદાનવિહરણોત્સર્ગાનન્દાન્ કરોતિ, નાતીતાનાગતાન્ ॥

'ત્રિકાલમાભ્યન્તરમ્' ઇતિ । ત્રયઃ કાલા યસ્ય તત્ ત્રિકાલમ્ । યથા બુદ્ધિર્વર્તમાનમધ્યવસ્યતિ । તથાતીતાનાગતાવપિ । માન્ધાતાસીત્ કલ્કી રાજા ભવિષ્યતીતિ । યથાહઙ્કારો વર્તમાનમભિમન્યતે તથાતીતાનાગતાવપિ । મમૈવમાસીત્, મમૈવં ભવિષ્યતીતિ । યથા ચ મનો વર્તમાનં

સઙ્કલ્પયતીતિ તથાતીતાનાગતાવપિ । તત્ર કિમિદં ભૂતં સ્યાત્, ન મમેતિ । કિમિદં ભવિષ્યતિ, નેતીતિ ॥ ૩૩॥

કારિકા ૩૪

નનુ ચ યદિ સ્થૂલાઃ પૃથિવ્યાદયસ્તે વિશેષાઃ । બાહ્યં બાહ્યકરણં સ્વવિષયં પ્રતિપદ્યતે । પૃથિવ્યાદયસ્તર્હિ ભેદેન પ્રતિપત્તવ્યા ઇત્યાહ-

॥ બુદ્ધીન્દ્રિયાણિ તેષાં પઞ્ચ વિશેષાવિશેષવિષયીણિ ।
વાગ્ભવતિ શબ્દવિષયા શેષાણિ તુ પઞ્ચવિષયીણિ ॥ ૩૪ ॥ ॥

'બુદ્ધીન્દ્રિયાણિ' ઇત્યાદિ । તેષામપિ ત્રયોદશાનાં કરણાનાં યાનિ પઞ્ચ બુદ્ધીન્દ્રિયાણિ, તાનિ વિશેષાવિશેષવિષયીણિ । શબ્દાદયઃ પઞ્ચ વિષયા દ્વિવિધાઃ - વિશેષા અવિશેષાશ્ચ । તત્ર યે સૂક્ષ્માસ્તન્માત્રલક્ષણાસ્તેઽવિશેષાઃ । યે સ્થૂલાઃ પૃથિવ્યાદયસ્તે વિશેષાઃ । વિશેષાશ્ચાવિશેષાશ્ચેતિ દ્વન્દ્વઃ । ત એવ વિષયા વિદ્યન્તે યેષામિતિ મત્વર્થોપઃ । વિશિષ્ટાનવિશિષ્ટાંશ્ચ વિષયાન્ ગૃહ્યન્તીત્યર્થઃ । તત્ર શ્રોત્રં સ્થૂલાન્ નાનાશબ્દાનવિકલાન્ ગૃહ્ણાતિ, શબ્દતન્માત્રં ચ । નાસિકા સ્થૂલાન્ સુરભ્યાદિગન્ધાન્, તન્માત્રં ચ ગૃહ્ણાતીતિ ॥

'વાગ્ભવતિ' । કેવલઃ શબ્દો વિષયો યસ્યાઃ, ન વિષયાન્તરમિત્યર્થઃ ॥ શેષાણિ પાણ્યાદીનિ ચત્વારિ, પઞ્ચ વિષયીણિ । પઞ્ચ વિષયા એષામિતિ । તત્ર પાણિઃ શબ્દસ્પર્શરૂપરસવન્તં ઘટાદિકમાદત્તે । પાદૌ શબ્દાદિમત્યાં ભૂમૌ વિહરતઃ । પાયુરુપસ્થશ્ચ શબ્દાદિમદેવ મલં શુક્રં ચ વિસૃજતિ । અનેન દ્વારેણ તુ સર્વં બાહ્યં કરણં પઞ્ચવિષયમેવ દ્રષ્ટવ્યમ્ । યં હિ યદેવમાશ્રિત્ય (?) સ્ફીતં તસ્ય શબ્દસ્પર્શરૂપરસગન્ધવત્ત્વાત્, 'બાહ્યં ત્રયસ્ય વિષયાખ્યમ્' ઇત્યુક્તમ્ ॥ ૩૪॥

કારિકા ૩૫

તત્કથં તસ્ય વિષય ઇત્યાહ-

॥ સાન્તઃકરણા બુદ્ધિઃ સર્વં વિષયમવગાહતે યસ્માત્ ।
તસ્માત્ ત્રિવિધં કરણં દ્વારિ, દ્વારાણિ શેષાણિ ॥ ૩૫ ॥ ॥

'સાન્તઃકરણા' ઇત્યાદિ । બુદ્ધેરુપાત્તત્વાચ્છેષમહઙ્કારો મનશ્ચાન્તઃકરણમ્ । તાભ્યાં યુક્તા બુદ્ધિઃ ॥

'સર્વમ્' ઇતિ । ત્રિષ્વપિ કાલેષુ વ્યવસ્થિતં વિષયમવગાહતે ગૃહ્ણાતિ યસ્માત્ , તસ્માત્ ત્રિવિધમન્તઃકરણં બુદ્ધ્યાદિ દ્વારિ ભવતિ । દ્વારાણ્યસ્ય સન્તીતિ કૃત્વા । શેષાણિ તુ બુદ્ધીયકર્મેન્દ્રિયાણિ (?) દ્વારાણિ । એભિર્દ્વારભૂતૈરન્તઃકરણં વિષયાન્ ગૃહ્ણાતિ ॥ ૩૫॥

કારિકા ૩૬

નનુ ચ યદ્યન્તઃકરણં બાહ્યકરણદ્વારેણ સર્વં વિષયમવગાહતે,
તસ્મિન્ કિં લક્ષણમિત્યાહ-
॥ એતે પ્રદીપકલ્પાઃ પરસ્પરવિલક્ષણા ગુણવિશેષાઃ ।
કૃત્સ્નં પુરુષસ્યાર્થં પ્રકાશ્ય બુદ્ધૌ પ્રયચ્છન્તિ ॥ ૩૬ ॥ ॥

'એતે' ઇત્યાદિ । શ્રોત્રાદયો વાગાદયો બુદ્ધ્યાદયશ્ચેત્યેતે ત્રયોદશ ગુણવિશેષાઃ, ત્રય એવ ગુણા અન્યોઽન્યાભિભવદ્વારેણ પરિણતાઃ શ્રોત્રાદિવ્યપદેશભાજ ઇત્યર્થઃ । પ્રદીપકલ્પાઃ, સ્વવૃત્ત્યા વિષયસ્ય પ્રકાશકત્વાત્ । પરસ્પરવિલક્ષણાઃ । એકસ્ય યા વૃત્તિઃ સ્વરૂપં ચ, ન તદિતરેષામપિ યદિ સ્યાદેતેનૈવ વિષયાવગાહનં સિદ્ધં કિમન્યેન ॥

'કૃત્સ્નમ્' ઇતિ । ત્રૈલોક્યગતં પુરુષસ્યાર્થં સૂક્ષ્મસ્થૂલવિષયલક્ષણં પ્રકાશ્યાભિવ્યક્તિં નીત્વા પશ્ચાદહઙ્કારાદયો દ્વાદશ બુદ્ધૌ પ્રયચ્છન્તિ, સ્થાપયન્તીત્યર્થઃ । અવગાહનફલમેતત્ । તસ્યાં ચ વિષયોપધાનોપરક્ત્યાં બુદ્ધૌ પુરુષ ઉપલભતે । તત્રેદમુચ્યતે - બુદ્ધ્યાધ્યવસિતમર્થં પુરુષ ॥ ।ત ઇતિ ॥ ૩૬॥

કારિકા ૩૭

નનુ ચ તુલ્યે કરણત્વે કિમિત્યહઙ્કારાદયો બુદ્ધૌ પ્રયચ્છન્તિ ।
પ્રાધાન્યાત્તદેવ દર્શયન્નાહ -
॥ સર્વં પ્રત્યુપભોગં યસ્માત્પુરુષસ્ય સાધયતિ બુદ્ધિઃ ।
સૈવ ચ વિશિનષ્ટિ પુનઃ પ્રધાનપુરુષાન્તરં સૂક્ષ્મમ્ ॥ ૩૭ ॥ ॥

'સર્વમ્' ઇત્યાદિ । ઉપભોગમુપભોગં પ્રતિ પ્રત્યુપભોગમ્ । દેવમનુષ્યતિર્યગ્યોનિશુ યો વિષયસ્યોપભોગસ્તં પ્રતિ સર્વં ત્રૈલોક્યગતવિષયં પુરુષસ્ય સાધયતિ, સમ્પાદયતિ । યસ્માદ્બુદ્ધિઃ પ્રધાનભૂતા સતી નાન્યઃ કશ્ચિત્, તસ્માત્ તાનિ કરણાનિ બુદ્ધૌ પ્રયચ્છન્તિ । (યથા ગ્રામે હિરણ્યાદિપ્રત્યયં કુટુમ્બિનઃ પ્રધાનાય પ્રયચ્છન્તિ) । પ્રધાનોઽપ્યાસન્નવર્ત્તિત્વાદ્ભોગપતય ઇતિ ॥

'સૈવ ચ વિશિનષ્ટિ' ઇતિ । યદા તમસ્વતી બુદ્ધિર્ભવતિ તદા સર્વમુપનીતં સમ્પાદયતિ । યદા સત્ત્વાધિકા બુદ્ધિર્ભવતિ, તદા જ્ઞાનસઙ્ગતા પ્રધાનપુરુષાન્તરં વિશિનષ્ટિ । પ્રધાનપુરુષયોર્વિભાગં કરોતીત્યર્થઃ । અન્યત્ પ્રધાનમન્યઃ પુરુષ ઇતિ ॥

'સૂક્ષ્મમ્' । સાંસારિકજ્ઞાનસ્યાવિષયત્વાત્ ॥ ૩૭॥

કારિકા ૩૮

વિશેષાવિશેષવિષયિણીત્યુક્તમ્, તત્ર કે વિશેષાઃ કેઽવિશેષાશ્ચેત્યત્રાહ-
॥ તન્માત્રાણ્યવિશેષાઃ, તેભ્યો ભૂતાનિ પઞ્ચ પઞ્ચભ્યઃ ।
એતે સ્મૃતા વિશેષાઃ, શાન્તા ઘોરાશ્ચ મૂઢાશ્ચ ॥ ૩૮ ॥ ॥

'તન્માત્રાણિ' ઇત્યાદિ । સૂક્ષ્મવિષયાસ્તન્માત્રાણીત્યુચ્યન્તે । તૈર્ન કશ્ચિદ્વિશિષ્યત ઇત્યવિશેષાઃ । યથા સૂક્ષ્મતૃણાગ્રાવસ્થિતં તેજો ન લક્ષ્યતે, ન ચ કિઞ્ચિત્ પ્રકાશયતિ, તદ્વત્ તેઽપ્યવિશેષાઃ ॥

'તેભ્યો ભૂતાનિ પઞ્ચ પઞ્ચભ્યઃ' ઇતિ । તન્માત્રેભ્યઃ પઞ્ચ મહાભૂતાન્યુત્પદ્યન્તે ॥

'એતે સ્મૃતા વિશેષાઃ' ઇતિ । શબ્દતન્માત્રાદેકગુણમાકાશમુત્પદ્યતે । એવં સ્પર્શાદિતન્માત્રાદ્ દ્વિત્રિચતુઃપઞ્ચગુણા વાય્વાદય ઉત્પદ્યન્તે । તૈશ્ચ તન્માત્રાણિ । વિશિષ્યન્ત ઇતિ વિશેષાઃ ॥

તે ચ કિંસ્વરૂપા ઇત્યાહ- 'શાન્તા ઘોરાશ્ચ મૂઢાશ્ચ' ઇતિ । શાન્તાઃ સુખપ્રદાહ ઘોરા દુઃખપ્રદાઃ, મૂઢા મોહપ્રદા ઇતિ ॥ ૩૮॥

કારિકા ૩૯

કિમેતાવન્ત એવ વિષેષા ઉતાન્યેઽપીત્યાહ-
॥ સૂક્ષ્મા માતાપિતૃજાઃ, સહ પ્રભૂતૈસ્ત્રિધા વિશેષાઃ સ્યુઃ ।
સૂક્ષ્માસ્તેષાં નિયતા, માતાપિતૃજા નિવર્તન્તે ॥ ૩૯ ॥ ॥

'સૂક્ષ્માઃ' ઇત્યાદિ । યે સૂક્ષ્માસ્તન્માત્રલક્ષણાઃ સંસારિણઃ શરીરસ્યાશ્રયતાં ગતાસ્તેઽપિ વિશેષાઃ, સૂક્ષ્મશરીરસ્યારબ્ધત્વાત્ ॥

'માતાપિતૃજાઃ' ઇતિ । માતાપિતૃજાઃ ષટ્ । તત્ર માતૃતો લોમલોહિતમાંસાનિ

પિતૃતઃ સ્નાય્વસ્થિમજ્જાનઃ । તેઽપિ વિશેષાઃ, તૈઃ સ્થૂલશરીરસ્ય
ષટ્કોશિકસ્યારબ્ધત્વાત્ । એતે દ્વિવિધા વિશેષા આધ્યાત્મિકાઃ ॥

'સહપ્રભૂતૈઃ' ઇતિ । યાનિ મહાભૂતાનિ બાહ્યાનિ શાન્તઘોરમૂઢાન્યુક્તાનિ
તાનિ સ્થૂલશરીરસ્યાવકાશવ્યૂહનપક્તિક્લેદનધારણકર્તૃત્વેન
પ્રકૃષ્ટભૂતાન્યુચ્યન્તે । તૈઃ સહ ત્રયો વિશેષાઃ ॥

'સૂક્ષ્માસ્તેષાં નિયતા માતાપિતૃજા નિવર્તન્તે' ઇતિ । સૂક્ષ્મશરીરનિયતં
જ્ઞાનપ્રાપ્તેઃ પ્રાક્, તસ્ય સાંસરિકત્વાત્ । સ્થૂલશરીરનિયતં તુ નિવર્તતે,
તસ્ય પ્રતિમરણં પતિતસ્ય રસભસ્મનિષ્ઠાન્તત્વાત્ ॥ ૩૯॥

કારિકા ૪૦

યદેતત્ સૂક્ષ્મશરીરં તત્કથમુત્પન્નમિત્યાહ-
॥ પૂર્વોત્પન્નમસક્તં નિયતમ્મહદાદિસૂક્ષ્મપર્યન્તમ્ ।
સંસરતિ નિરુપભોગં ભાવૈરધિવાસિતં લિઙ્ગમ્ ॥ ૪૦ ॥ ॥

'પૂર્વોત્પન્નમ્' ઇત્યાદિ । પ્રધાનેનાદિસર્ગે પ્રતિપુરુષમુત્પાદિતત્વાત્
પૂર્વોત્પન્નમ્ । અસક્તમપ્યાહ । તન્ન ક્વચિદ્વિહન્યતે, પર્વતમપિ ભિત્ત્વા
ગચ્છતિ ॥

'નિયતમ્' । નિત્યમ્, જ્ઞાનોત્પત્તેઃ પ્રાગિત્યર્થઃ ॥

કિંપરિમાણમિદમિત્યાહ- 'મહદાદિસૂક્ષ્મપર્યન્તમ્' ઇતિ । બુદ્ધિરાદિર્યસ્ય તત્,
મહદાદિસૂક્ષ્મવિષયાસ્તન્માત્રલક્ષણાઃ પર્યન્તં યસ્ય તત્ સૂક્ષ્મપર્યન્તમ્ ।
બુદ્ધિરહઙ્કાર એકાદશેન્દ્રિયાણિ પઞ્ચ તન્માત્રાણીત્યેતત્પરિમાણમિત્યર્થઃ ॥

'સંસરતિ' । ત્રિષુ લોકેષુ ॥

'નિરુપભોગમ્' ઇતિ । બાહ્યેન સ્થૂલશરીરેણ વિકલત્વાદ્વિષયભોગસમર્થં
ન ભવતીત્યર્થઃ ॥

'ભાવૈરધિવાસિતમ્' ઇતિ । ધર્માદિભિરુપરક્તમિત્યર્થઃ ॥

'લિઙ્ગમ્' ઇતુ । પ્રલયકાલે લયં ગચ્છતીતિ કૃત્વા ॥ ૪૦॥

કારિકા ૪૧

નનુ કરણમાત્રમેવ સંસરતિ, કિં સૂક્ષ્મશરીરેણેત્યાહ-
॥ ચિત્રં યથાશ્રયમૃતે સ્થાણ્વાદિભ્યો વિના યથા ચ્છાયા ।
તદ્વદ્વિનાઽવિશેષૈર્ન તિષ્ઠતિ નિરાશ્રયં લિઙ્ગમ્ ॥ ૪૧ ॥ ॥

'ચિત્રમ્' ઇત્યાદિ । યથા કુડ્યાદિકમાશ્રયમૃતે ચિત્રં ન તિષ્ઠતિ ॥

'સ્થાણ્વાદિભ્યઃ' ઇતિ । આદિશબ્દેન વૃક્ષસ્તમ્બાદયઃ । 'પૃથગ્વિનાનાનાભિસ્તૃતીયાન્યતરસ્યામ્' ઇતિ પઞ્ચમ્યપિ ભવતિ । તૈર્વિના યથા ચ્છાયા સ્નિગ્ધા પરુષા વા ન તિષ્ઠતિ ॥

'તદ્વદ્વિનાઽવિશેષૈર્ન તિષ્ઠતિ નિરાશ્રયં લિઙ્ગમ્' ઇતિ । અવિશેષાસ્તન્માત્રાણિ । લિઙ્ગં ત્રયોદશવિધં કરણમિહ ગૃહ્યતે । ન તિષ્ઠતિ નિરાશ્રયત્વાત્ । (તર્હિ સૂક્ષ્મશરીરમારબ્ધમ્, તદભાવાત્તદપિ નાસ્તીતિ નિરાશ્રયત્વાત્) । ન સંસરતિ । ન ચ નિરાધારેણ કરણેન પુરુષસ્ય સંયોગઃ સમ્ભવતિ । પુરુષોઽપિ નિષ્ક્રિયત્વાન્ન સંસરતિ ॥ ૪૧॥

કારિકા ૪૨

તદેવ સૂક્ષ્મશરીરં કિમર્થં સંસરતીત્યાહ-
॥ પુરુષાર્થહેતુકમિદં નિમિત્તનૈમિત્તિકપ્રસઙ્ગેન ।
પ્રકૃતેર્વિભુત્વયોગાન્નટવદ્વ્યવતિષ્ઠતે લિઙ્ગમ્ ॥ ૪૨ ॥ ॥

'પુરુષાર્થહેતુકમ્' ઇત્યાદિ । પુરુષાર્થો દ્વિવિધ ઉક્તઃ । સ હેતુર્યસ્યેતિ । સમાસાન્તઃ કપ્ ॥

'ઇદમ્' ઇતિ । મહદાદિ સૂક્ષ્મપર્યન્તં લિઙ્ગમુક્તમ્, તન્નટવદવતિષ્ઠતે । યથૈક એવ નટસ્તં તં વિશેષમાસ્થાય યવનિકાન્તો નિર્ગત્ય રાજામાત્યવિદુષકાદિભાવેનાનુવિદ્ધોઽવતિષ્ઠતે, તથા લિઙ્ગમપિ તં તં દેહમાસ્થાય દેવમનુષ્યતિર્યગ્ભાવેન વ્યવતિષ્ઠતે ॥

તદેવ કથં ભવતીત્યાહ- 'નિમિત્તનૈમિત્તિકપ્રસઙ્ગેન' ઇતિ । નિમિત્તં ધર્માધર્માદિ, નૈમિત્તિકમૂર્ધ્વાધોગમનાદિ । વક્ષ્યતિ ચ । તયોઃ પ્રસઙ્ગેનેતિ ॥

કિમેતત્સર્વમીશ્વરાત્ કિં વા સ્વભાવાદિત્યત્રાહ- 'પ્રકૃતેઃ વિભુત્વયોગાત્' ઇતિ । પ્રકૃતિઃ પ્રધાનમ્, તસ્યા વિભુત્વં જગત્કર્તૃત્વમ્ । તદ્યોગાત્ નટવદ્વ્યવતિષ્ઠતે । પ્રધાનેનૈવ હિ પુરુષસ્યાર્થઃ કર્તવ્ય ઇતિ મહદાદિસૂક્ષ્મપર્યન્તં લિઙ્ગમુત્પાદ્ય ધર્માદિભિરધિવાસયતિ । તદધિવાસિતં ચ નટવત્ વ્યવતિષ્ઠતે । નેશ્વરાન્ન સ્વભાવાદિતિ ભાવૈરધિવાસિતમિત્યુક્તમ્ ॥ ૪૨॥

કારિકા ૪૩

તે પુનઃ કિયન્તઃ કિમાશ્રિતા ઇત્યાહ-
॥ સાંસિદ્ધિકાશ્ચ ભાવાઃ પ્રાકૃતિકા વૈકૃતાશ્ચ ધર્માદ્યાઃ ।
દૃષ્ટા કરણાશ્રયિણઃ કાર્યાશ્રયિણઃ કલલાદ્યાઃ ॥ ૪૩ ॥ ॥

'સાંસિદ્ધિકાશ્ચ' ઇત્યાદિ । યે પ્રાકૃતસ્વભાવાસ્તે સાંસિદ્ધિકા ઉચ્યન્તે । તે ચ કપિલસ્યૈવ મહામુનેર્નાન્યસ્ય । તસ્ય હ્યુત્પદ્યમાનસ્યૈવાદિસર્ગે સહોત્પન્ના ધર્મજ્ઞાનવૈરાગ્યૈશ્વર્યસંજ્ઞકાશ્ચત્વારો ભાવાઃ । યે ત્વાદિસર્ગાદુત્તરકાલમુત્પન્નકાર્યકારણાનામસ્મદ્વિધાનાં પ્રયત્નપૂર્વકા ઉત્પદ્યન્તે, તે વૈકૃતાઃ ॥

તે ચ દ્વિવિધાઃ । યદાહ- 'ધર્માદ્યા દૃષ્ટાઃ કરણાશ્રયિણઃ કાર્યાશ્રયિણશ્ચ કલલાદ્યાઃ' ઇતિ । ધર્માદયશ્ચત્વારઃ, વિપરીતાશ્ચાધર્માદયશ્ચત્વાર ઇત્યષ્ટૌ । એતે ત્રયોદશવિધં કરણમાશ્રિત્ય પ્રવર્તન્તે । કાર્યં પઞ્ચ, કુક્ષિસ્થસ્યાસ્ય નિશ્છુરિતસ્ય તુ કૌમારયૌવનવાર્દ્ધકાનિ ત્રયઃ, ઇત્યષ્ટૌ ભાવાઃ । તત્ર વૈકૃતે ધર્માદિભિરધિવાસિતં સંસરતીતિ જ્ઞેયમ્ ॥ ૪૩॥

કારિકા ૪૪

નિમિત્તનૈમિત્તિકપ્રસઙ્ગેનેત્યુક્તમ્ । તદુભયમપિ દર્શયિતુમાહ-
॥ ધર્મેણ ગમનમૂર્ધ્વં, ગમનમધસ્તાદ્ભવત્યધર્મેણ ।
જ્ઞાનેન ચાપવર્ગો, વિપર્યયાદિષ્યતે બન્ધઃ ॥ ૪૪ ॥ ॥

'ધર્મેણ' ઇત્યાદિ । ધર્માદિનિમિત્તમૂર્ધ્વગમનાદિ નૈમિત્તિકમ્ । તત્ર ધર્મેણ યમનિયમલક્ષણેન ગમનમૂર્ધ્વમિતિ, સૂક્ષ્મશરીરસ્ય દેવાદિવ્યવસ્થિતિરિત્યર્થઃ ॥

'ગમનમધસ્તાદ્ભવયધર્મેણ' ઇતિ । તિર્યગ્યોનિષુ સ્થિતિઃ । મિશ્રાન્મનુષ્યલોકે સ્થિતિરિત્યર્થોક્તમ્ ॥

'જ્ઞાનેન ચાપવર્ગઃ' ઇતિ । પ્રધાનપુરુષાન્તરજ્ઞાનાખ્યેન જ્ઞાનેન લિઙ્ગં નિવર્તતે । તતઃ કેવલઃ પુરુષો ભવતિ ॥

'વિપર્યયાદિષ્યતે બન્ધઃ' ઇતિ । જ્ઞાનવિપર્યયાદજ્ઞાનાત્ સંસારચક્રબન્ધઃ, પુનઃ પુનરાવર્તનમ્ । સ ચ ત્રિપ્રકારઃ - પ્રકૃતિબન્ધઃ, દક્ષિણાબન્ધઃ, વિકારબન્ધશ્ચેતિ । યેષાં

પ્રકૃતિરેવ પરતત્ત્વં નાન્યત્, તેષાં પ્રકૃતિવાદિનાં પ્રાકૃતિકો બન્ધઃ ।
યેષામિષ્ટાપૂર્તભાવિન એવ દિવ્યાદિવ્યમાનુષભોગાઃ પુરુષાર્થ ઇતિ, તેષાં
કર્મવાદિનાં દક્ષિણાબન્ધઃ । ઇષ્ટાપૂર્તં દક્ષિણેતિ । તથા ચોક્તમ્-
અગ્નિહોત્રં તપઃ સત્યં દેવાનાં પરિપાલનમ્ ।
અતિથિર્વૈશ્વદેવં ચ ઇષ્ટમિત્યભિધીયતે ॥

પુષ્કરિણ્યઃ સભા વાપ્યો દેવતાયતનાનિ ચ ।
અન્નપ્રદાનમારામઃ પૂર્તમિત્યભિધીયતે ॥

યેષાં વિકાર એવૈશ્વર્યલક્ષણઃ પુરુષાર્થ ઇતિ, તેષાં વિકારત્વવાદિનાં
વૈકારિકો બન્ધઃ ॥ ૪૪॥

કારિકા ૪૫

॥ વૈરાગ્યાત્ પ્રકૃતિલયઃ, સંસારો ભવતિ રાજસાદ્રાગાત્ ।
ઐશ્વર્યાદવિઘાતો વિપર્યયાત્તદ્વિપર્યાસઃ ॥ ૪૫ ॥ ॥

'વૈરાગ્યાત્' ઇત્યાદિ । યો વિષયાદિદર્શનાદ્વિરક્તો યમનિયમપરિસ્થિતો
ન જ્ઞાનં પર્યેષતે, તસ્ય મૃતસ્ય વૈરાગ્યાદષ્ટાસ્યુ પ્રકૃતિષુ
પ્રધાનાદિતન્માત્રપર્યન્તાસુ લયઃ, સ્થૂલશરીરેણ વિષયોપભોગનિમિત્તેન
યોગઃ । તલ્લીનશ્ચાત્માનં મુક્તમિવ મન્યતે ન તુ મુક્તમ્, સર્ગકાલે પુનઃ
સંસરણાત્ । યદા તુ જ્ઞાનં પર્યેષ્યતે તદા મુચ્યત એવ । તથા ચોક્તમ્-
જ્ઞાનાદથ વિરાગાચ્ચ તથા કૃત્સ્નસ્ય સંક્ષયાત્ ।
ઇત્યેવં જાયતે મોક્ષો મુક્ત આત્મસ્થ ઉચ્યતે ॥ ઇતિ ॥

'સંસારો ભવતિ રાજસાદ્રાગાત્' ઇતિ । વૈરાગ્યવિષયોઽશુભવિષયાભિષ્વઙ્ગો
રાજસો રાગઃ, તસ્ય શુભાશુભકર્માક્ષેપકત્વાત્ । તસ્માદ્દેવાદિષ્વયં
જનાદ્યજિભાવેન (?) સંસરતિ ॥

'ઐશ્વર્યાદવિઘાતઃ' ઇતિ । અનૈશ્વર્યાત્તદ્વિપર્યાસ ઇતિ । અવિઘાતવિપર્યાસો
વિઘાતઃ, પ્રાર્થિતાનામપ્રાપ્તિરિત્યર્થહ । મુક્તિસ્તુ દુરોત્સારિતૈવ ॥ ૪૫॥

કારિકા ૪૬

એષામષ્ટાનાં બુદ્ધિરુપાણામેકેન મોક્ષઃ સપ્તભિર્બન્ધઃ સંસાર ઇતિ
યદેતન્નિમિત્તનૈમિત્તિકં ષોડશમુક્તં તત્સંક્ષેપેણ ચતુર્વિધમાહ -
॥ એષ પ્રત્યયસર્ગો વિપર્યયાશક્તિતુષ્ટિસિદ્ધ્યાખ્યઃ ।
ગુણવૈષમ્યવિમર્દેન તસ્ય ભેદાસ્તુ પઞ્ચાશત્ ॥ ૪૬ ॥ ॥

'એષઃ' ઇત્યાદિ । પ્રત્યયશબ્દેન બુદ્ધિરુચ્યતે । તસ્ય સર્ગો યઃ ષોડશવિધ ઉક્તઃ, એષ વિપર્યયાશક્તિતુષ્ટિસિદ્ધ્યાખ્યઃ । વિપર્યયાદીનામાખ્યા યસ્ય પ્રત્યયસર્ગસ્ય સ તથોક્તઃ । તત્ર વિપર્યયમજ્ઞાનમ્, અશક્તિર્જ્ઞાનાધિગમાસામર્થ્યં સત્યામપ્યધિજિગાંસાયામ્, તુષ્ટિર્મોક્ષોપાયેષુ વૈમુખ્યમ્, સિદ્ધિર્જ્ઞાનપ્રાપ્તિઃ ॥

તસ્ય ચતુવિધસ્ય પુનઃ પઞ્ચાશત્ ભેદા ભવન્તિ । કેન પ્રકારેણેત્યાહ- 'ગુણવૈષમ્યવિમર્દેન' ઇત્યાદિ । સત્ત્વરજસ્તમસામન્યોઽન્યાભિભવદ્વારેણ વૈષમ્યં વિષમભાવઃ, એકસ્ય દ્વયોર્વાધિક્યેઽન્યસ્યાનાધિક્યમ્ । એકદ્વિત્રિયોગેન ષડ્વિધં વૈષમ્યમ્ । તેન દ્વયોર્વિમર્દઃ પરસ્પરક્ષોભઃ । તેન હેતુના ભવતીત્યર્થઃ ॥ ૪૬॥

કારિકા ૪૭

તાન્ ભેદાન્ દર્શયન્નાહ-
॥ પઞ્ચ વિપર્યયભેદા ભવન્ત્યશક્તિશ્ચ કરણવૈકલ્યાત્ ।
અષ્ટાવિંશતિભેદા તુષ્ટિર્નવધાઽષ્ટધાસિદ્ધિઃ ॥ ૪૭ ॥ ॥

'પઞ્ચ વિપર્યયભેદાઃ' ઇત્યાદિ । અજ્ઞાનાખ્યસ્ય સર્ગસ્ય ભેદાઃ પઞ્ચ- તમો મોહો મહામોહસ્તામિસ્રોઽન્ધતામિસ્રશ્ચેતિ । અત એવ સાંખ્યપ્રવચને ક્લેશા ઉચ્યન્તે । 'અવિદ્યાસ્મિતારાગદ્વેષાભિનિવેશાઃ ક્લેશાઃ' ઇતિ । તત્રાવિદ્યાક્ષેત્રમુત્તરેષામ્ ॥

'અશક્તિશ્ચ' ઇતિ । અશક્ત્યાખ્યઃ સર્ગઃ ॥

'કરણવૈકલ્યાત્' ઇતિ । કરણં બાહ્યમાભ્યન્તરં ચ । તયોર્વૈકલ્યાદષ્ટાવિંશતિભેદા યસ્યાઃ અશક્તેઃ સા ભવતીતિ વિભક્તિપરિણામેન યોજ્યમ્ । કરણવૈકલ્યં ચ ગુણવૈષમ્યવિમર્દેન ભવતિ ॥

'તુષ્ટિર્નવધાઽષ્ધા સિદ્ધિઃ' । ઇતિ તુષ્ટિસર્ગો નવપ્રકારઃ, સિદ્ધિસર્ગોઽષ્ટપ્રકારો ભવતીત્યર્થઃ । એતૈઃ સમુદાયેન પઞ્ચાશદ્ભેદા ઇતિ ॥ ૪૭॥

કારિકા ૪૮

તાનવાન્તરભેદસહિતાન્ દર્શયન્નાહ-
< ભેદસ્તમસોઽષ્ટવિધો મોહસ્ય ચ, દશવિધો મહામોહઃ ।

તામિસ્રોઽષ્ટાદશધા, તથા ભવત્યન્ધતામિસ્રઃ ॥ ૪૮ ॥ ॥

'ભેદસ્તમસઃ' ઇત્યાદિ । તમ ઇત્યવિદ્યોચ્યતે । સા ચોત્તરેષાં પ્રસવભૂમિઃ ।
સા ચ પ્રકૃતિઃ । તત્ત્વવેદિનાં સત્યપિ વૈરાગ્યે નાપવર્ગ ઇતિ,
જ્ઞાનસ્યાભાવાત્ । તતશ્ચ તેષામષ્ટાસ્વેવ પ્રકૃતિષુ લયો ભવતીતિ
અષ્ટવિધા અવિદ્યા, વિષયસ્યાષ્ટવિધત્વાત્ ॥

મોહસ્ય ચેતિશબ્દેનાષ્ટવિધો ભેદ ઇત્યનુવર્તતે । મોહ ઇત્યસ્મિતોચ્યતે ।
દેવા અપિ વિનાશિનોઽપિ, અષ્ટગુણમૈશ્વર્યમાશ્રિતા આત્માનમવિનાશિનં
મન્યન્તે । તતશ્ચ તેષામષ્ટવિધો મોહઃ, ઐશ્વર્યસ્યાષ્ટવિધત્વાત્ ॥

'દશવિધો મહામોહઃ' ઇતિ સુખાનુશયો રાગો મહામોહ ઇત્યુચ્યતે ।
સ ચ દિવ્યાદિવ્યવિષયેષુ વર્તમાનો દશવિધો ભવતિ । તત્ર
સૂક્ષ્માસ્તન્માત્રલક્ષણાઃ પઞ્ચ, સુખૈકસ્વભાવત્વાદ્દિવ્યાઃ । સ્થૂલાઃ
પૃથિવ્યાદયઃ પઞ્ચ, સુખદુઃખમોહાત્મકત્વાદદિવ્યાઃ ॥

'તામિસ્રોઽષ્ટાદશધા' ઇતિ । દુઃખાનુશયો દ્વેષસ્તામિસ્ર ઇત્યુચ્યતે ।
સ ચાષ્ટગુણૈશ્વર્યે દશવિધે ચ વિષયે પ્રતિભવતીત્યષ્ટાદશવિધઃ ॥

'તથા ભવત્યન્ધતામિસ્રઃ' ઇતિ । યથા તામિસ્રોઽષ્ટાદશધા
તથાઽયમપીત્યર્થઃ । મરણત્રાસોઽન્ધતામિસ્ર ઉચ્યતે । સ
ચાષ્ટગુણૈશ્વર્યે દશવિધે ચ વિષયે પ્રતિભવતીત્યષ્ટાદશવિધઃ ॥

'તથા ભવત્યન્ધતામિસ્રઃ' ઇતિ । યથા તામિસ્રોઽષ્ટાદશધા
તથાઽયમપીત્યર્થઃ । મરણત્રાસોઽન્ધતામિસ્ર ઉચ્યતે ।
સ ચાષ્ટગુણૈશ્વર્યે દશવિધે વિષય એવ ભવતીતિ । એવં
દ્વિષષ્ટિભેદમજ્ઞાનમુક્તમ્ ॥ ૪૮॥

કારિકા ૪૯

અશક્તિઃ કરણવૈકલ્યાદિત્યુક્તમ્, તસ્યા ભેદાન્ દર્શયિતુમાહ-
॥ એકાદશેન્દ્રિયવધઃ સહ બુદ્ધિવધૈરશક્તિરુપદિષ્ટા ।
સપ્તદશધા ચ બુદ્ધેર્વિપર્યયાસ્તુષ્ટિસિદ્ધિનામ્ ॥ ૪૯ ॥ ॥

'એકાદશ' ઇત્યાદિ । એકાદશાનામિન્દ્રિયાણામેકાદશૈવોપઘાતાઃ ।
શ્રોત્રચક્ષુર્ઘ્રાણાનાં બાધિર્યાન્ધત્વાઘ્રાતૃત્વાનિ, વાચો મૂકત્વમ્,
જિહ્વાયા જાડ્યમ્, મનસ ઉન્માદઃ, પાણિપાદોપસ્થાનાં કૌણ્યપઙ્ગુત્વક્લૈબ્યાનિ,
ત્વગિન્દ્રિયસ્ય કુષ્ઠઃ, પાયોરુદાવર્ત ઇતિ ।

બાધિર્યમાન્ધ્યાઘ્રાતૃત્વે મૂકતા જડતા તથા ।
ઉન્માદકૌણ્યકુષ્ઠાનિ ક્લૈબ્યોદાવર્તપઙ્ગુતાઃ ॥ ઇતિ ॥

અત ઇન્દ્રિયવધા અશક્તિરિત્યુપદિષ્ટાઃ સાંખ્યાચાર્યૈઃ ॥

'સહ બુદ્ધિવધૈઃ' ઇતિ । બુદ્ધેરપિ વધા અશક્તિરુપદિષ્ટા ॥ તે કિયન્ત ઇત્યાહ- 'સપ્તદશધા ચ બુદ્ધેર્વુપયયાસ્તુષ્ટિસિદ્ધીનામ્' ઇતિ । તુષ્ટયો નવ, સિદ્ધયશ્ચાષ્ટૌ । વક્ષ્યમાણામ્ભસાં યે વિપર્યયાસ્તે સપ્તદશવિધા બુદ્ધેર્જ્ઞેયાઃ । એવમશક્તિરષ્ટાવિંશતિભેદા યયા ક્રમસ્વશક્તો ભવતિ ॥

નનુ પ્રત્યયસર્ગ ઇત્યુક્તમ્, નાયમિન્દ્રિયવધઃ પ્રત્યયસર્ગઃ કિઞ્ચિદહઙ્કારસર્ગ ઇતિ સત્યમ્, અહઙ્કારસ્ય પ્રત્યયસર્ગત્વાત્ તત્સર્ગોઽપિ પ્રત્યયસર્ગ ઉચ્યતે । ધર્મો વા પ્રત્યયઃ સર્ગઃ ॥ ૪૯ ॥

કારિકા ૫૦

તુષ્ટિભેદાનાહ-
॥ આધ્યાત્મિકાશ્ચતસ્રઃ પ્રકૃત્યુપાદાનકાલભાગ્યાખ્યાઃ ।
બાહ્યા વિષયોપરમાત્ પઞ્ચ, નવ તુષ્ટયોઽભિમતાઃ ॥ ૫૦ ॥ ॥

'આધ્યાત્મિકાઃ' ઇત્યાદિના । પ્રકૃત્યાદીન્યાખ્યા યાસાં તુષ્ટીનાં તાસ્તથોક્તાઃ । તત્ર પ્રકૃતિઃ પ્રધાનમ્ । સૈવ વ્યક્તાત્મના પરિણમ્ય બન્ધમોક્ષૌ કુરુત ઇત્યેતાવન્માત્રોપદેશાત્ તુષ્ટો ભવતિ યસ્તસ્ય પ્રકૃત્યાખ્યા તુષ્ટિરમ્ભ ઇત્યુચ્યતે ॥

ઉપાદીયતે પ્રાપ્યતે મોક્ષોઽનેનેત્યુપાદાનમ્ । પ્રવ્રજ્યાલિઙ્ગં ચાત્ર દણ્ડાદિ । ન પ્રકૃતિજ્ઞાનમાત્રેણ મુક્તિઃ । 'ઉપાદાનેન ચાપરે' ઇત્યસ્માદદ્વિતીયાદુપદેશાદિહૈવ મુક્તિઃ પ્રાપ્તવ્યેતિ પરિતુષ્ટઃ પ્રવ્રજિતોઽયં તસ્ય દ્વિતીયા ઉપાદાનાખ્યા તુષ્ટિઃ સલિલમુચ્યતે ॥

કલ્યત ઇતિ કાલા । મહદાદિસૂક્ષ્મપર્યન્તેન લિઙ્ગેન સંસરતાઽપરેણ મોક્ષો ન પ્રકૃત્યુપાદાનમાત્રાદિહૈવ જન્મનીતિ તસ્માત્તૃતીયાદુપદેશાત્ તુષ્ટો યઃ કાલાપેક્ષી સ્થિતસ્તસ્ય કાલાખ્યા તુષ્ટિરોઘ ઇત્યુચ્યતે ॥

યસ્યાપરં ભાગ્યમસ્તિ તસ્ય મોક્ષઃ, પ્રકૃત્યુપાદાનકાલમાત્રેણ ન, કશ્ચિદ્વિપરીતભાગધેયોઽસ્તીતિ તસ્માચ્ચતુર્થાદુપદેશાત્ તુષ્ટો યો ભાગ્યાપેક્ષી સ્થિતસ્તસ્ય ચતુર્થી વૃષ્ટિરિત્યુચ્યતે । એતાશ્ચતસ્ર આત્માનમધિકૃત્ય ભવન્તીત્યાધ્યાત્મિકાઃ આત્મના મોક્તવ્યમિતિ કૃત્વા ॥

'બાહ્યવિષયોપરમાચ્ચ' ઇતિ । શબ્દાદિભ્યો વ્યાવૃત્તિરુપરમણં પઞ્ચધા ભવતિ । આર્જનરક્ષણક્ષયસઙ્ગહિંસાદોષદર્શનાત્ । તત્ર વિષયાર્જને મહદ્દુઃખં તદલ્પવિષયેભ્ય ઇત્યાર્જનદોષદર્શનાન્નિવૃત્તસ્ય તુષ્ટિરિયં પઞ્ચમી સુતારમિત્યુચ્યતે ॥

વિષયા આર્જિતું શક્યાઃ, રક્ષણં તુ દુઃખં બહુભિઃ તજ્જન્યમાનાનાં (?) સ્યાદિતિ રક્ષણદર્શનાન્નિવૃતસ્ય તુષ્ટિરિયં ષષ્ઠી સુપારમિત્યુચ્યતે ॥

વિષયા આર્જિતું રક્ષિતું ક્ષયે ચ પ્રતિવિધાતું શક્યાઃ, કિન્તૂપભુજ્યમાના મહતીમાત્મસક્તિં કુર્વન્તિ, તદપ્રાપ્તૌ ચ મહદ્દુઃખમિતિ સઙ્ગદોષદર્શનાદુપરસ્તસ્યાષ્ટમી તુષ્ટિરનુત્તમામ્ભ ઇત્યુચ્યતે ॥

સર્વં શક્યં કિન્ત્વનુપહત્ય ભૂતાનિ ન ભોગઃ સમ્ભવતિ । ભૂતોપઘાતાન્મહદનિષ્ટફલમિતિ હિંસાદોષદર્શનાદુપરતસ્ય તુષ્ટિરિયં નવમી ઉત્તમામ્ભ ઇત્યુચ્યતે । એતાઃ પઞ્ચ વિષયદ્વારેણેતિ ભવન્તીતિ બાહ્યાઃ । તત્પૂર્વિકાશ્ચાધ્યાત્મિકાઃ, વિષયે તત્પરસ્યાધ્યાત્મિકતુષ્ટ્યસમ્ભવાત્ ॥

તત્ર પ્રકૃત્યુપાદાનકાલા ન મોક્ષોપાયા ઇત્યુપદિષ્ટમપિ યો વૈમુખ્યાન્ન પ્રતિપદ્યતે તસ્યાધ્યાત્મિકાશ્ચતસ્રઃ, વિષયોપરમાચ્ચ બાહ્યાઃ પઞ્ચેતિ નવ તુષ્ટયઃ । તા બુદ્ધિવધા ઇત્યુચન્તે । તેષાં શક્તેરન્તર્ભવતિ [?] । તાસાં ચતુષ્ષષ્ટીનાં મહત્પ્રભૃતયો વિપર્યયેણ સંજ્ઞા । તદુભયમપિ બુદ્ધાવન્તર્ભૂતં તત્સર્ગત્વાત્ ॥ ૫૦॥

કારિકા ૫૧

કતિભેદા જ્ઞાનાજ્ઞાનલક્ષણા સિદ્ધિરિત્યાહ-
॥ ઊહઃ શબ્દોઽધ્યયનં દુઃખવિઘાતાસ્ત્રયઃ સુહૃત્પ્રાપ્તિઃ ।
દાનં ચ સિદ્ધયોઽષ્ટૌ, સિદ્ધેઃ પૂર્વોઽઙ્કુશસ્ત્રિવિધઃ ॥ ૫૧ ॥ ॥

'ઊહઃ શબ્દોઽધ્યયનમ્' ઇત્યાદિ । સિદ્ધિર્જ્ઞાનપ્રાપ્તિઃ, તસ્યા ભેદા ઉપાયભેદાત્ । ઊહ ઇતિ । જન્માન્તરસંસ્કૃતધિયો યસ્ય બન્ધમોક્ષકારણમુત્પ્રેક્ષમાણસ્ય પ્રધાનપુરુષાન્તરજ્ઞાનમુત્પદ્યતે તસ્ય સિદ્ધિરૂહહેતુકા પ્રથમા તારમિત્યુચ્યતે ॥

યસ્ય સાંખ્યશાસ્ત્રપાઠમન્યદીયમાકર્ણ્ય તત્ત્વજ્ઞાનમુત્પદ્યતે, સા સિદ્ધિઃ શબ્દહેતુકા દ્વિતીયા સુતારમિત્યુચ્યતે ॥

યસ્ય શિષ્યાચાર્યસમ્બન્ધેન સાંખ્યશાસ્ત્રં શબ્દતોઽર્થતશ્ચાધીત્ય
જ્ઞાનમુત્પદ્યતે, તસ્યાધ્યયનહેતુકા । અધ્યયનેન હિ તત્પરિજ્ઞાનાત્ ।
એષા તૃતીયા તારવિ ઇત્યુચ્યતે ॥

'દુઃખવિઘાતાસ્ત્રયઃ' ઇતિ । યોઽપ્યાધ્યાત્મિકેનાધિભૌતિકેનાધિદૈવિકેન વા
ભાવિતસ્તદ્વિઘાતાર્થં જ્ઞાનં પર્યેષ્યતિ, ઊહેન શબ્દેનાધ્યયનેન વા,
તસ્ય તદ્વિઘાતહેતુકાઃ પ્રમાદપ્રમુદિતમોદનાખ્યાસ્તિસ્રઃ, ઉપાયસ્ય ત્રિત્વાદિતિ ।
પૂર્વા યાસ્તિસ્રઃ સિદ્ધ્યયસ્તા ન દુઃખહેતુકા ઇતિ બોદ્ધવ્યાઃ ॥

'સુહૃત્પ્રાપ્તિઃ' ઇતિ । યોઽધિગતતત્ત્વઃ સુહૃદં પ્રાપ્ય
જ્ઞાનમધિગચ્છતિ, તસ્ય સુહૃત્પ્રાપ્તિપૂર્વિકા । મિત્રં હિ સ્નેહાત્ જ્ઞાનં
પ્રકાશયતિ । ઇયં સપ્તમી રમ્યકમિત્યુચ્યતે ॥

દાનં ચ સિદ્ધિહેતુઃ । દાનેન હ્યારાધિતો જ્ઞાની જ્ઞાનં પ્રયચ્છતિ ।
ઇયમષ્ટમી સદાપ્રમુદિતમિત્યુચ્યતે ॥

તદ્વિપરીતા અસિદ્ધયઃ । મન્દબુદ્ધિત્વાન્નોહતે યસ્તસ્યાનૂહહેતુકા અસિદ્ધિઃ ।
યઃ શક્તોઽપિ સાંખ્યશાસ્ત્રં શ઼ૃણ્વન્નપિ બુદ્ધિદૌર્બલ્યાન્ન બુદ્ધ્યતિ તસ્ય
શબ્દહેતુકા અસિદ્ધિઃ । બુદ્ધિદોષ એવાયમ્ । યસ્ય ગુરુપૂર્વકં નાધ્યયનં
બુદ્ધિદોષાદેવ તસ્યાનધ્યયનહેતુકા અસિદ્ધિઃ । ન યત્ર મિત્રસંગ્રહો ન ચ
દાનમિત્યષ્ટાવસિદ્ધયો બુદ્ધિવધા અશક્તાવન્તર્ભૂતાઃ । તાસાં ચાસિદ્ધીનાં
મોષમુષ્ણામાનોરમિત્યાદ્યાઃ [?] સંજ્ઞાઃ । બુદ્ધાવન્તર્ભૂતં તત્સર્ગત્વાત્ ॥

'સિદ્ધેઃ પૂર્વોઽઙ્કુશસ્ત્રિવિધઃ' ઇતિ । તસ્યા અષ્ટવિધાયાઃ સિદ્ધેર્યઃ
પૂર્વો વિપર્યયાશક્તિતુષ્ટ્યાખ્યસ્ત્રિવિધ ઉક્તઃ સોઽઙ્કુશ ઇવેત્યઙ્કુશ
ઉક્તઃ । તેન હ્યસ્વતન્ત્રીકૃતો લોકઃ સંસારચક્રેઽવતિષ્ઠતે । તત્ર
વિપર્યયાદિષ્યતે બન્ધ ઇતિ વચનાત્ પઞ્ચવિધમજ્ઞાનમઙ્કુશઃ । અશક્તિઃ
કરણવૈકલ્યમ્, તતો હિ જ્ઞાનાપ્રાપ્તિરિત્યઙ્કુશઃ । તુષ્ટિરપ્યઙ્કુશઃ ।
તદા પ્રકૃત્યુપાદાનકાલભાગ્યા મોક્ષોપાયા ઇતિ, વિષયોપરમાચ્ચ મુક્ત
ઇત્યેતાવન્માત્રાદુપદેશાત્ તુષ્ટો ન જ્ઞાનં પર્યેષ્યતિ । યદા તુ પર્યેષ્યતિ
તદાઽનઙ્કુશ ઇત્યર્થઃ । એતે પ્રત્યયસર્ગભેદાઃ પઞ્ચાશત્ પદાર્થાઃ,
અસ્તિત્વાદયશ્ચ દશ । તે ચાસ્યામેવ સપ્તત્યાં નિર્દિષ્ટાઃ । તથા ચાહ
સંગ્રહકારઃ-
અસ્તિત્વમેકત્વમથાર્થવત્ત્વં પારાર્થ્યમન્યત્વમકર્તૃભાવઃ ।
યોગો વિયોગો બહવઃ પુમાંસઃ સ્થિતિઃ શરીરસ્ય ચ શેષવૃત્તિઃ ॥ ઇતિ ॥

એકત્વમર્થવત્ત્વં પારાર્થ્યં ચેતિ પ્રધાનમધિકૃત્યોક્તમ્ । અન્યત્વમકર્તૃત્વં બહુત્વં ચેતિ પુરુષમધિકૃત્ય । અસ્તિત્વં યોગો વિયોગશ્ચેત્યુભયમધિકૃત્ય । સ્થિતિર્મૂલસૂક્ષ્મમધિકૃત્ય । વક્ષ્યતિ- 'તિષ્ઠતિ સંસ્કારવશાત્' ઇતિ । એતે ષષ્ટિ પદાર્થાઃ, તદર્થં શાસ્ત્રં ષષ્ટિતન્ત્રમિત્યુચ્યતે ॥ ૫૧॥

કારિકા ૫૨

પૂર્વોત્પન્નં લિઙ્ગં ભાવૈરધિવાસિતં સંસરતીત્યુક્તમ્, તત્ર કિં ભાવા અપિ પૂર્વમુત્પન્નાઃ કિં લિઙ્ગમેવેત્યત્રાહ-
॥ ન વિના ભાવૈર્લિઙ્ગમ્, ન વિના લિઙ્ગેન ભાવનિષ્પત્તિઃ ।
લિઙ્ગાખ્યો ભાવાખ્યસ્તસ્માદ્દ્વિવિધઃ પ્રવર્તતે સર્ગઃ ॥ ૫૨ ॥ ॥

'ન વિના' ઇત્યાદિ । યદિ ભાવા ન પૂર્વોત્પન્નાસ્તૈર્વિના લિઙ્ગમપિ નાસ્તિ । સંસરણાર્થં લિઙ્ગં સંસારનિમિત્તં ચ ભાવાઃ ॥

'ન વિના લિઙ્ગેન ભાવનિષ્પત્તિઃ' ઇતિ । લિઙ્ગં વિના ન ભાવાનિષ્પત્તિઃ, લિઙ્ગાશ્રિતત્વાદ્ભાવાનામ્ । યસ્માદેવં તસ્માત્ લિઙ્ગાખ્યો ભાવાખ્યશ્ચ દ્વિપ્રકારઃ પ્રધાનત્વાત્ સર્ગો ભવતીતિ । સૃજ્યત ઇતિ સર્ગઃ ॥ ૫૨॥

કારિકા ૫૩

યથા દ્વાવેતૌ પૂર્વોત્પન્નૌ તથ ભૂતસર્ગોઽપીતિ દર્શયન્નાહ-
॥ અષ્ટવિકલ્પ દૈવસ્તૈર્યગ્યોન્યશ્ચ પઞ્ચધા ભવતિ ।
માનુષ્યશ્ચૈકવિધઃ, સમાસતો ભૌતિકઃ સર્ગઃ ॥ ૫૩ ॥ ॥

'અષ્ટવિકલ્પઃ' ઇત્યાદિ । દેવાનામયં દૈવઃ । સોઽષ્ટવિધઃ । તદ્યથા બ્રાહ્મઃ, પ્રાજાપત્યઃ, સૌરઃ, આસુરઃ, ગાન્ધર્વઃ, યાક્ષઃ, રાક્ષસઃ, પૈશાચશ્ચેતિ ॥

'તૈર્યગ્યોન્યશ્ચ પઞ્ચધા ભવતિ' ઇતિ । તિર્યગ્યોનીનામયં તૈર્યગ્યોન્યઃ । પશુમૃગપક્ષિસરીસૃપસ્થાવરભેદાત્ પઞ્ચવિધઃ । તત્ર ગવાદ્યા રાસભાન્તાઃ પશવઃ । સિંહાદ્યા બિડાલાન્તા મૃગાઃ । હંસાદ્યા મશકાન્તાઃ પક્ષિણઃ । સર્પાદયઃ કૃમ્યન્તાઃ સરીસૃપાઃ । વૃક્ષાદયઃ સ્થૂણાન્તાઃ સ્થાવરા ઇતિ ॥

'માનુષ્યશ્ચૈકવિધઃ' ઇતિ । મનુષ્યાણામયં માનુષ્યઃ । એવંવિધસંસ્થાનસ્યૈકવિધત્વાત્ । બ્રાહ્માદિભેદોઽપિ સત્ત્વરજસ્તમસાં

વિકલ્પાત્ કાલવ્યવહારનિમિત્તમ્ ॥

'સમાસતઃ' ઇતિ । સંક્ષેપેણ । વિસ્તરમ્ ॥।તસ્તસ્યૈવ (?) -
જરાયુજાણ્ડજોષ્મજોદ્ભિજ્જાખ્યાશ્ચત્વારો ભેદાઃ શાસ્ત્રાન્તરે દ્રષ્ટવ્યાઃ ।
ઉદ્ભિજ્જાઃ સ્થાવરાઃ ॥

'ભૌતિકઃ સર્ગઃ' ઇતિ । ભૂતેષુ ભવો ભૌતિકઃ, લોકોત્પાદ ઇત્યર્થઃ ।
સ ચ દ્વિવિધઃ ॥ ૫૩॥

કારિકા ૫૩

સ્થૂલશરીરે સત્ત્વયિ કશ્ચિદેવ ક્વચિદધિક્યેન વર્તત ઇતિ દર્શયન્નાહ-
॥ ઊર્ધ્વં સત્ત્વવિશાલસ્તમોવિશાલશ્ચ મૂલતઃ સર્ગઃ ।
મધ્યે રજોવિશાલો, બ્રહ્માદિસ્તમ્બપર્યન્તઃ ॥ ૫૪ ॥ ॥

'ઊર્ધ્વમ્' ઇત્યાદિ । બ્રહ્મા આદિર્યસ્ય સર્ગસ્ય સ્તમ્બશ્ચ તૃણવિટપપર્યન્તઃ,
સ બ્રહ્માદિસ્તમ્બપર્યન્તઃ સર્ગઃ । સ ઊર્ધ્વઃ સત્ત્વવિશાલઃ । ઊર્ધ્વં
દેવલોકસ્તસ્યોત્કૃષ્ટત્વાત્ તત્ર સાત્ત્વિક ઇત્યર્થઃ । દેવલોકસ્ય
સત્ત્વબહુલત્વાત્ ॥

'તમોવિશાલશ્ચ મૂલતઃ સર્ગઃ' ઇતિ । તૈર્યગ્યોનો મૂલમ્, તસ્યાધમત્વાત્ ।
તસ્મિન્ મૂલે તમોઽધિકં તમોબહુલત્વાત્ ॥

'મધ્યે રજોવિશાલઃ' ઇતિ । મનુષ્યલોકે મધ્યે । ઉત્તરાધરભાવાત્ તત્ર
દુઃખબહુલત્વાત્ ॥ ૫૪॥

કારિકા ૫૫

યદિ ત્રિષુ લોકેષુ લિઙ્ગં સંસરતિ, તદેવ તર્હિ સાંસારિકં સુખં દુઃખં
વાપ્નોતિ, તસ્યૈવ સાંસારિકત્વાદિત્યાહ-
॥ તત્ર જરામરણકૃતં દુઃખં પ્રાપ્નોતિ ચેતનઃ પુરુષઃ ।
લિઙ્ગસ્યાવિનિવૃત્તેસ્તસ્માદ્ દુઃખં સ્વભાવેન ॥ ૫૫ ॥ ॥

'તત્ર' ઇત્યાદિ । તેષુ લોકેષુ જરામરણકૃતમિતિ ચતુર્દુઃખોપલક્ષણાર્થમ્ ।
ગર્ભદુઃખમ્, જન્મદુઃખમ્, જરાદુઃખમ્, મરણદુઃખમિતિ । તત્ર
માતુઃ કુક્ષૌ અન્ધતમસીવ પ્રવિષ્ટસ્ય સઙ્કુચનપ્રસારણદુઃખં
ગર્ભદુઃખમ્ । જાયમાનસ્ય માતુરુદરાન્નિર્ગચ્છતો જન્મદુઃખમ્ । વ
॥।પાલતસ્ખલનાદિદુઃખં જરાદુઃખમ્ । મરણાવસ્થાયાં સ્થૂલશરીરં
ત્યજતો મરણદુઃખમ્ । એતત્ત્વાધ્યાત્મિકં દુઃખેઽન્તર્ભૂતમપ્રીતદુઃખં

બુદ્ધ્યાધ્યવસિતં પુરુષઃ પ્રાપ્નોતિ તસ્ય ચેતનત્વાત્, ન તુ
લિઙ્ગમચેતનત્વાદિતિ ભાવઃ ॥

કિયન્તં કાલમિત્યાહ- 'લિઙ્ગસ્યાવિનિવૃત્તેઃ' ઇતિ ।
યાવલ્લિઙ્ગસ્યાવિનિવૃત્તિસ્તાવદિત્યર્થઃ । તસ્ય ચ નિવૃત્તિઃ
પ્રધાનપુરુષાન્તરજ્ઞાનાત્ । યતશ્ચૈવં તસ્માદ્દુઃખં સ્વભાવેન ।
લિઙ્ગગર્ભાદ્યવસ્થાસુ સ્વભાવતો દુઃખમિત્યર્થઃ । લોકત્રયે સુખમપિ
પ્રાપ્નોતિ, તન્નોક્તં તસ્યાનિયતત્વાત્ । જરાદિદુઃખં તુ નિયતમિતિ ॥ ૫૫॥

કારિકા ૫૬

યોઽયં ભાવલિઙ્ગભૂતતત્સર્ગઃ સ કિમીશ્વરાત્, યથોચ્યતે-
ઈશ્વરપ્રેરિતો ગચ્છેત્ સ્વર્ગં વા શ્વભ્રમેવ વા ।
ઇતિ, કિં વા પુરુષાત્, યથોચ્યતે-
પુરુષ એવેદં સર્વં યદ્ભૂતં યચ્ચ ભવ્યમ્ ।
ઇતિ, કિં વા સ્વભાવાત્, યથોચ્યતે-
સ્વભાવિકમેવેદં સર્વં જગન્નહિ મરુદાદયઃ કેનચિત્ ક્રિયન્તે ।
ઇત્યત્રાહ-
॥ ઇત્યેષ પ્રકૃતિકૃતો મહદાદિવિશેષભૂતપર્યન્તઃ ।
પ્રતિપુરુષવિમોક્ષાર્થં સ્વાર્થ ઇવ પરાર્થ આરમ્ભઃ ॥ ૫૬ ॥ ॥

'ઇત્યેષ પ્રકૃતિકૃતઃ' ઇત્યાદિ । આરભ્યત ઇત્યારમ્ભઃ । પ્રકૃતિકૃત
ઇતિ પ્રધાનકૃતઃ, નેશ્વરાદિકૃત ઇત્યર્થઃ । લોકત્રયં ત્રિગુણાત્મકં
ભવતિ, તચ્ચ ત્રિગુણાયા એવ પ્રકૃતેરુત્પદ્યતે । નપૈ સ્વભાવિકમ્,
વિપરીતગુણદોષપ્રસઙ્ગાદ્દેશાનિયમયોગાચ્ચ ॥

સ કિંસ્વરૂપ ઇત્યાહ- 'મહદાદિવિશેષભૂતપર્યન્તઃ' ઇતિ ।
બુદ્ધિરાદિર્યસ્યારમ્ભસ્ય । ભૂતાનિ લોકત્રયે યાન્યભિન્નસંસ્થાનાનિ
સ્થૂલશરીરાખ્યાનિ । વિષયાશ્ચ । બાહ્યાશ્ચ વિષયાઃ સૂક્ષ્માઃ સ્થૂલાઃ ।
તે પર્યન્તેઽવસાને યસ્ય સ તથોક્તઃ । અનેન ભાવલિઙ્ગભૂતસર્ગાખ્યાસ્ત્રય
આખ્યાતાઃ ॥

કિમર્થમયં પ્રધાનસ્યારમ્ભ ઇત્યત્રાહ- 'પ્રતિપુરુષવિમોક્ષાર્થમ્'
ઇતિ । એકૈકસ્ય પુરુષસ્ય પુરુષસ્ય વિમુક્ત્યર્થમારમ્ભઃ, પુરુષાણાં
બહુત્વાત્ । ભાવસર્ગે ભૂતસર્ગે ચાનેક ઇતિ દર્શયતિ । તથાહિ મોક્ષાર્થં
વિષયોપભોગાર્થં ચાયમારમ્ભ ઇતિ દ્રષ્ટવ્યમ્ । પ્રધાનેન હિ પુરુષાર્થઃ

કર્તવ્યઃ । સ ચ દ્વિવિધઃ । વિષયોપભોગઃ કૈવલ્યં ચ । તદુભયં કૃત્વા નિવર્તત ઇતિ ॥

'સ્વાર્થઃ' ઇતિ । યઃ કશ્ચિત્ દેવદત્તસ્વાર્થ એવ પરાર્થો રહિતિતં પ્રવર્તતે ન પરસ્તપસ્તકરોતિ (?) તથા પ્રધાનમપીત્યર્થઃ ॥ ૫૬॥

કારિકા ૫૭

નનુ ચ સચેતનસ્ય બુદ્ધિપૂર્વિકા પ્રવૃત્તિર્ભવતિ,
પ્રધાનસ્યાચેતનત્વાત્કથં લોકત્રયે પુરુષં વિષયૈઃ સંયોજ્ય ધ્યાનેન
વિપ્રમોચ્ય નિવર્તેત । કથમેવંવિધા પ્રવૃત્તિઃ । નાયં નિયમઃ,
અચેતનાનામપિ લોકે પ્રવૃત્તિદર્શનાત્ । યદાહ-
॥ વત્સવિવૃદ્ધિનિમિત્તં ક્ષીરસ્ય યથા પ્રવૃત્તિરજ્ઞસ્ય ।
પુરુષવિમોક્ષનિમિત્તં તથા પ્રવૃત્તિઃ પ્રધાનસ્ય ॥ ૫૭ ॥ ॥

'વત્સવિવૃદ્ધિનિમિત્તમ્' ઇત્યાદિ । વત્સસ્ય વિવૃદ્ધિઃ પુષ્ટિઃ । તસ્યા નિમિત્તમ્ ॥

'ક્ષીરસ્ય યથા પ્રવૃત્તિરજ્ઞસ્ય' ઇતિ । અચેતનસ્ય । યથા તૃણદિકમચેતનં ગવાશિતં પીતં ચ, વત્સસ્ય પુષ્ટિઃ કર્તવ્યેતિ, ક્ષીરાત્મના પરિણમતિ કૃતાર્થં ચ નિવર્તત ઇતિ ॥ ૫૭॥

કારિકા ૫૮

યદિ પુરુષવિમોક્ષાર્થં પ્રધાનસ્ય પ્રવૃત્તિઃ, પ્રવૃત્તેઃ પ્રાક્ પુરુષસ્ય
કૈવલ્યં સ્થિતમેવ, તત્ કિં તેન પ્રવૃત્તેન? તથા ચાહુઃ -
મધ્વર્થં પ્રસ્થિતઃ કશ્ચિદ્ ગ્રામાભ્યાશે તુ માક્ષિકમ્ ।
અક્કે ચેન્મધુ વિન્દેત કિમર્થં પર્વતં વ્રજેત્ ॥ ઇતિ ॥

અત્રાહ-
॥ ઔત્સુક્યનિવૃત્ત્યર્થં યથા ક્રિયાસુ પ્રવર્તતે લોકઃ ।
પુરુષસ્ય વિમોક્ષાર્થં પ્રવર્તતે તદ્વદવ્યક્તમ્ ॥ ૫૮ ॥ ॥

'ઔત્સુક્યમ્' ઇત્યાદિ । યથૌત્સુક્યનિવૃત્ત્યર્થમભિમતક્રિયાસુ લોકઃ પ્રવર્તતે, તદ્વત્ પ્રલયાવસ્થાયાં પુરુષોऽપિ મોક્ષનિમિત્તં યદૌત્સુક્યં તન્નિવૃત્તયે પ્રવર્તયેત્પ્રધાનમિતિ ॥ ૫૮॥

કારિકા ૫૯

ઉદાહરણાન્તરમાહ-
॥ રઙ્ગસ્ય દર્શયિત્વા નિવર્તતે નર્ત્તકી યથા નૃત્તાત્ ।
પુરુષસ્ય તથાઽઽત્માનં પ્રકાશ્ય વિનિવર્તતે પ્રકૃતિઃ ॥ ૫૯ ॥ ॥

'રઙ્ગસ્ય' ઇત્યાદિ । નૃત્યતીતિ નર્ત્તકી । સા તથા રઙ્ગસ્ય નૃત્તં દર્શયિત્વા તસ્માન્નૃત્તાન્નિવર્તતે વિરમતિ, દૃષ્ટાહમનેનેતિ કૃતપ્રયોજના સતી, તથા પુરુષસ્યાત્માનં સમ્પ્રકાશ્ય દેવાદિભાવરૂપં ગતા નિવર્તતે પ્રકૃતિઃ પ્રધાનમિત્યર્થઃ ॥ ૫૯॥

કારિકા ૬૦

નનુ ચ નટી રઙ્ગાત્ સ્વાર્થં સાધયતિ, પ્રકૃતેસ્તુ પુરુષાર્થઃ સ્વાર્થો યેનૈવમાચરયતીત્યાહ-
॥ નાનાવિધૈરુપાયૈરુપકારિણ્યનુપકારિણઃ પુંસઃ ।
ગુણવત્યગુણસ્ય સતસ્તસ્યાર્થમપાર્થકં ચરતિ ॥ ૬૦ ॥ ॥

'નાનાવિધૈઃ' ઇત્યાદિ । પૂર્વં સપ્તભિર્ધર્માદિભિરુપાયૈસ્ત્રિષુ વિષયેષ્વાત્મનં પ્રકાશયત્યુપકારિણી, તદનન્તરમેકેન જ્ઞાનાખ્યેન કૈવલ્યં કુર્વાણોપકારિણી ભવતિ ॥

'અનપકારિણઃ પુંસઃ' ઇતિ । ન પુમાંસ્તાં પ્રત્યુપકરોતિ, અહમનયોપકૃત ઇતિ । પુનસ્સા તમુપકરોતિ ॥

નાસૌ તામિત્યાહ - ' ગુણવત્યગુણસ્ય સતઃ' ઇતિ । ગુણસત્ત્વાત્પ્રકૃતિઃ સક્રિયા, નિર્ગુણત્વાત્ પુરુષો નિષ્ક્રિય ઇતિ । તસ્યાર્થમપાર્થકં ચરતિ । તસ્ય પુંસોઽર્થો દ્વિવિધઃ- વિષયોપભોગઃ કૈવલ્યં ચ । તન્નિરર્થકં કરોતિ, યતસ્તસ્યાઃ પ્રયોજનાભાવઃ । વ્યક્તાત્મનાઽઽત્માનં દર્શયતિ નત્વવ્યક્તાત્મના ॥ ૬૦॥

કારિકા ૬૧

તથાહિ - ગુણાનાં સામ્યાવસ્થા પ્રકૃતિઃ । કુતશ્ચ સા ન સર્વાત્મનાઽઽત્માનં પ્રકાશયતિ, પુમાનપિ ન સર્વથા પશ્યતિ ? તથા ચાહુઃ-
ગુણાનાં પરમં રૂપં ન દૃષ્ટિપથમૃચ્છતિ ।
યત્તુ દૃષ્ટિપથં પ્રાપ્તં તન્માયાવસ્તુ તુચ્છકમ્ ॥ ઇતિ । અત્રાહ -
॥ પ્રકૃતેઃ સુકુમારતરં ન કિઞ્ચિદસ્તીતિ મે મતિર્ભવતિ ।

યા દૃષ્ટાસ્મીતિ પુનર્ન દર્શનમુપૈતિ પુરુષસ્ય ॥ ૬૧ ॥ ॥

'પ્રકૃતેઃ' ઇત્યાદિ । સુકુમારતરમિતિ સૂક્ષ્મતરમિતરત્ । એતદુક્તં ભવતિ- પ્રાગ્વ્યક્તાત્મના પ્રકાશયતિ ન ત્વવ્યક્તાત્મનાપિ, યેન જ્ઞાનાવસ્થાયાં પ્રકૃતેર્મતિર્ભવતિ મમ સૂક્ષ્મતરં ન કિઞ્ચિદપરમસ્તિ યદ્દ્રષ્ટવ્યં પુરુષેણ ॥

('યા દૃષ્ટાઽસ્મિ' ઇતિ । સા પ્રકૃતિર્વ્યક્તાત્મના ચ) દૃષ્ટાહમનેનેતિ ન પુનર્દર્શનમુપૈતિ પુરુષસ્ય, દ્રષ્ટવ્યાભાવાત્ । તતશ્ચૈવં સર્વથા પ્રકૃતિરાત્માનં પ્રકાશયતિ, પુરુષશ્ચૈતાં સર્વથા પશ્યતિ ॥ ૬૧॥

કારિકા ૬૨

તસ્માન્ન પુરુષસ્ય બન્ધો નાપિ સંસરણં મોક્ષો વેત્યાહ-
॥ તસ્માન્ન બધ્યતેઽદ્ધા ન મુચ્યતે નાપિ સંસરતિ કશ્ચિત્ ।
સંસરતિ બધ્યતે મુચ્યતે ચ નાનાશ્રયા પ્રકૃતિઃ ॥ ૬૨ ॥ ॥

'તસ્માન્ન બધ્યતે' ઇત્યાદિ । બન્ધાભાવાન્ન બધ્યતે । પુરુષસ્યાપિ કાર્યત્વાદ્બન્ધો નાસ્તિ । ન વિમુચ્યતે તસ્યા બન્ધનાત્ । નાપિ સંસરતિ નિષ્ક્રિયત્વાત્ । કશ્ચિદિતિ પુરુષ ઇત્યર્થઃ ॥

કસ્ય તર્હિ બન્ધાદય ઇત્યાહ- સંસરતિ બધ્યતે મુચ્યતે ચ પ્રકૃતિરિતિ । નનુ ચ તસ્યાઃ સુકુમારત્વાદ્બન્ધાદયો ન સમ્ભવન્ત્યેવેત્યત્રાહ- નાનાશ્રયેષુરભિવજ્યતે (?) । તત્રાશ્રયાઃ ભાવલિઙ્ગભૂતાસ્સર્ગાઃ । તે પ્રકૃતિપુરુષવન્નાનાવિધાઃ ॥ ૬૨॥

કારિકા ૬૩

તતશ્ચ નાનાશ્રયત્વાદેવ દર્શયન્નાહ-
॥ રૂપૈઃ સપ્તભિરેવ તુ બધ્નાત્યાત્માનમાત્મના પ્રકૃતિઃ ।
સૈવ ચ પુરુષાર્થમ્પ્રતિ વિમોચયત્યેકરૂપેણ ॥ ૬૩ ॥ ॥

'રૂપૈઃ' ઇત્યાદિ । ધર્માદયો બુદ્ધે રૂપાન્યુક્તાનિ । 'સપ્તભિઃ' । જ્ઞાનં ત્યક્ત્વા તે ચ પ્રકૃતેરાત્મભૂતાઃ । સૈવાત્મનૈવ પુરુષાર્થં પ્રત્યાત્માનં મહદાદિસૂક્ષ્મપર્યન્તં લિઙ્ગં બધ્નાતિ । બન્ધશ્ચ ત્રિવિધઃ । તચ્ચ લિઙ્ગં ભાવાદિભિરધિવાસિતમર્થમેવ । સંસરતીતિ । પ્રકૃતિરેવ સંસરતિ ॥

'સૈવ ચ' ઇતિ । પ્રકૃતિઃ પુરુષાર્થં પ્રતિ કૈવલ્યાર્થં

વિમોચયત્યાત્માનમ્ ॥

'એકરૂપેણ' ઇતિ । એકં ચ તદ્રૂપં ચેતિ । જ્ઞાનાખ્યેન રૂપેણેત્યર્થઃ । યં પુરુષમપેક્ષ્ય જ્ઞાનમુત્પાદયતિ તં પ્રત્યવ્યક્તમાત્માનં સંહરતીત્યર્થઃ । નહિ ધર્માદયઃ પુરુષધર્મા યસ્તૈર્બધ્યતે । નાપિ સંસરતિ, અલિઙ્ગભાવત્વાત્ । નાપિ મુચ્યતે, તસ્ય બન્ધનત્વાત્ ॥ ૬૩ ॥

કારિકા ૬૪

તદેવં જ્ઞાનં કથમુત્પદ્યતે યેન મોચયતીત્યાહ-
॥ એવં તત્ત્વાભ્યાસાન્નાસ્મિ ન મે નાહમિત્યપરિશેષમ્ ।
અવિપર્યયાદ્વિશુદ્ધં કેવલમુત્પદ્યતે જ્ઞાનમ્ ॥ ૬૪ ॥ ॥

'એવં તત્ત્વાભ્યાસાત્' ઇત્યાદિ । એવમિતિ વક્ષ્યમાણે યોજ્યમ્ । તત્ત્વાનિ પઞ્ચવિંશતિઃ । તેષાં પુનઃ પુનઃ સ્વરૂપેણાભ્યસનમભ્યાસઃ । યદેતત્ સૂક્ષ્મશરીરં ભૌતિકં ચ તસ્મિન્ન ભવામિ, અપિ તુ પ્રકૃતિઃ ॥

'ન મે' ઇત્યાદિ । ન મમેદમપિ તુ પ્રકૃતેઃ ॥

નાહમિતિ । નાપ્યહં પ્રકૃતિરિત્યેવં તત્ત્વાભ્યાસાત્ । કિંવિશિષ્ટાત્ - અવિપર્યયાદહમિત્યમાનસંશયાત્ જ્ઞાનમુત્પદ્યતે ॥

ઈદૃશમિત્યાહ- 'અપરિશેષમ્' ઇતિ । પરિપૂર્ણં વિશુદ્ધમ્ સંસારમલાપગમાત્ કેવલમેકમિત્યર્થઃ ॥ ૬૪ ॥

કારિકા ૬૫

નનુ જ્ઞાનેન પુરુષઃ કિં પશ્યતીત્યાહ-
॥ તેન નિવૃત્તપ્રસવામર્થવશાત્ સપ્તરૂપવિનિવૃત્તામ્ ।
પ્રકૃતિં પશ્યતિ પુરુષઃ પ્રેક્ષકવદવસ્થિતઃ સ્વસ્થઃ ॥ ૬૫ ॥ ॥

'તેન' ઇત્યાદિ । યત્ પ્રકૃતિજ્ઞાનમુત્પદ્યતે તં પ્રતિ નિવૃતઃ પ્રસવો લિઙ્ગભૂતસર્ગાખ્યો યસ્યાઃ પ્રકૃતેઃ સ તથોક્તા । પ્રસવનિવૃત્ત્યા વા યો વિષયો વિષયેભ્યો નિવર્તતે તદ્વશાત્, સપ્તભ્યો રૂપેભ્યો ધર્માદિભ્યો નિવૃત્તા પ્રકૃતિર્ભવતિ । ભાવસંસર્ગોઽપિ યસ્યા નિવર્તત ઇત્યર્થઃ । તામેવંવિધામવ્યક્તરૂપાં પશ્યતિ પુરુષઃ ॥

'પ્રેક્ષકવદવસ્થિતઃ' ઇતિ । યથા પ્રેક્ષકઃ પ્રવર્ત્તિતનૃત્તમુપસંહૃતનૃત્તાં ચ નર્ત્તકીં પશ્યતિ, તથા

પુરુષોઽપિ પ્રવર્તિતસર્ગામુપસંહૃતસર્ગાં ચેતિ ॥

'સ્વસ્થઃ' ઇતિ । આત્મનિ સ્થિતો ન પ્રકૃતિસ્થઃ, તતઃ પ્રકૃતેર્નિવૃત્તત્વાત્ ॥ ૬૫॥

કારિકા ૬૬

નનુ ચ યદિ પ્રકૃતિર્ગર્ભભૂઃપુરુષં પ્રતિ નિવૃત્તપ્રસવા, તસ્યાશ્ચ પ્રકૃતેસ્તદાનીં સર્વગતત્વાદસ્ત્યેવ સંયોગસ્તત્કિમિતિ પુનઃ શરીરોત્પત્તિર્ન ભવતીત્યાહ -

॥ દૃષ્ટા મયેત્યુપેક્ષક એકો દૃષ્ટાઽહમિત્યુપરમત્યન્યા ।
સતિ સંયોગેઽપિ તયોઃ પ્રયોજનં નાસ્તિ સર્ગસ્ય ॥ ૬૬ ॥ ॥

'દૃષ્ટા મયા' ઇત્યાદિ । તયોર્દ્વયોરેકઃ પુરુષ ઉપેક્ષકઃ, સર્વથા ॥।ત્વાત્ । યથા પ્રેક્ષકો નટીમુપેક્ષતે નિવૃત્તાભિલાષત્વાત્ ॥

'દૃષ્ટાઽહમિત્યુપરતાઽન્યા' ઇતિ । અપરા પ્રકૃતિરુપરતા નિવૃત્તપ્રસવા । સર્વથાઽહમનેન દૃષ્ટેતિ ॥

તતશ્ચ સંયોગેઽપિ તયોઃ પ્રયોજનં નાસ્તિ સર્ગસ્ય । વિષયોપભોગાર્થઃ સર્ગઃ । તસ્મિન્નેવ ચરિતાર્થત્વાત્ ન પુનઃ સર્ગમારભતે । નહિ નટી રઙ્ગે પ્રેક્ષકૈર્નિરાકાંક્ષિતં પુનર્નૃત્તમારભતે ॥ ૬૬॥

કારિકા ૬૭

યદ્યાત્મજ્ઞાનાત્ કૈવલ્યપ્રાપ્તિઃ, તદનન્તરમેવ શરીરં કસ્માન્ન નિવર્તત ઇત્યાહ-

॥ સમ્યગ્જ્ઞાનાધિગમાત્ ધર્માદીનામકારણપ્રાપ્તૌ ।
તિષ્ઠતિ સંસ્કારવશાત્, ચક્રભ્રમવદ્ધૃતશરીરઃ ॥ ૬૭ ॥ ॥

'સમ્યક્ જ્ઞાનાધિગમાત્' ઇત્યાદિ । સમ્યક્ જ્ઞાનમાત્મજ્ઞાનમ્ । તસ્યાધિગમાદાત્મજ્ઞાનપ્રાપ્તેરિત્યર્થઃ ॥

'ધર્માદીનામકારણપ્રાપ્તૌ' ઇતિ । ન કારણમકારણમ્, તસ્યામકારણપ્રાપ્તાવેવ તદુક્તં ભવતિ । સમ્યક્ જ્ઞાનાધિગમાત્તેષાં ધર્માદીનામગ્નિદગ્ધબીજવદશક્તત્વાત્ ॥

જન્માન્તરસંસ્કારવશાદ્ધૃતશરીરઃ પુમાંસ્તિષ્ઠતિ । કથમ્- ચક્રભ્રમવત્ । યથા કુલાલવ્યાપારે નિવૃત્તેઽપિ વેગવશાત્ કિયન્તમપિ

કાલં ચક્રભ્રમસ્તિષ્ઠતિ તથા શરીરમપીત્યર્થઃ ॥ ૬૭॥

કારિકા ૬૮

કદા સ મોક્ષો ભવતીત્યત્ર-
॥ પ્રાપ્તે શરીરભેદે ચરિતાર્થત્વાત્ પ્રધાનવિનિવૃત્તૌ ।
ઐકાન્તિકમાત્યન્તિકમુભયં કૈવલ્યમાપ્નોતિ ॥ ૬૮ ॥ ॥

'પ્રાપ્તે શરીરભેદે' ઇત્યાદિ । લિઙ્ગભૌતિકશરીરે પૃથગ્ભૂતે યથા
સંભૂતે લયં ગતિ તેષ્વિત્યર્થઃ (?)॥

'ચરિતાર્થત્વાત્ પ્રધાનવિનિવૃત્તૌ' ઇતિ । પ્રધાનં લિઙ્ગાત્મના પરિણતં
નિવર્તતે । નિવૃત્તાવુભયં કૈવલ્યમાપ્નોતિ ॥

'ઐકાન્તિકમાત્યન્તિકં ચ' ઇતિ । તત્રાત્મજ્ઞાનોત્પાદાદવશ્યંભાવિ
કૈવલ્યમિત્યૈકાન્તિકમ્ । સત્યપિ તયોઃ સંયોગે પ્રયોજનાભાવાન્ન પુનઃ સર્ગ
ઇત્યાત્યન્તિકમિતિ ॥ ૬૮॥

કારિકા ૬૯

સપ્તત્યાં વિશુદ્ધિં દર્શયન્નાહ-
॥ પુરુષાર્થજ્ઞાનમિદં ગુહ્યં પરમર્ષિણા સમાખ્યાતમ્ ।
સ્થિત્યુત્પત્તિપ્રલયાશ્ચિન્ત્યન્તે યત્ર ભૂતાનામ્ ॥ ૬૯॥

'પુરુષાર્થજ્ઞાનમ્' ઇત્યાદિ । પુરુષાર્થં જ્ઞાનં ચેતિ પુરુષાર્થજ્ઞાનમ્ ।
યદિદં પઞ્ચવિંશતિતત્ત્વજ્ઞાનં તત્પ્રધાનમ્, પુરુષાર્થમોક્ષોઽનેન
પ્રાપ્યત ઇતિ કૃત્વા । ગુહ્યમિદમપ્રકાશ્યમ્ । સાધુજનાદન્યસ્મૈ ન
દેયમિત્યર્થઃ ॥

'પરમર્ષિણા સમાખ્યાતમ્' ઇતિ । કપિલમુનિના પ્રકાશિતમ્ ॥

'સ્થિત્યુત્પત્તિપ્રલયાશ્ચિન્ત્યન્તે યત્ર ભૂતાનામ્' ઇતિ । યત્ર જ્ઞાને
ભૂતાનાં બ્રહ્માદિસ્તમ્બપર્યન્તાનાં સ્થિત્યાદયો વ્યવસ્થાપ્યન્તે ।
તત્રોત્પન્નાનાં પ્રબન્ધેનાવસ્થાનં સ્થિતિઃ । સા ચ ત્રિષુ સ્થાનેષુ
દૈવમાનુષતૈર્યગ્યોનેષુ ઉત્પત્તિઃ સૃષ્ટપ્રધાનાત્ યાવત્ તન્માત્રેભ્યઃ
પઞ્ચમહાભૂતાનિ । સૃષ્ટ્યુપસંહારે મહાપ્રલયઃ, સર્વોઽપ્યુત્ક્રમેણ ।
તદ્યથા પૃથિવ્યાદયસ્તન્માત્રાદિષુ લીયન્તે યાવત્પ્રધાનમિતિ । તેન
પઞ્ચવિંશતિતત્ત્વવ્યતિરિક્તં નાસ્તીત્યેતદુક્તમ્ ॥ ૬૯॥

કારિકા ૭૦

મુનિના સમાખ્યાતમિતિ કુતો જ્ઞાયત ઇત્યાહ-
॥ એતત્ પવિત્રમગ્ર્યં મુનિરાસુરયેઽનુકમ્પયા પ્રદદૌ ।
આસુરિરપિ પઞ્ચશિખાય, તેન ચ બહુધા કૃતં તન્ત્રમ્ ॥ ૭૦॥

'એતત્' ઇત્યાદિ । 'પવિત્રમ્' ઇતિ । દુઃખત્રયમેતત્ પુનાતીતિ કૃત્વા ।
સર્વભેદાનામગ્રેભવત્વાદગ્ર્યમ્ ॥

'મુનિરાસુરયેઽનુકમ્પયા પ્રદદૌ' ઇતિ । કપિલસ્ય મહામુનેઃ
સહોત્પન્નાશ્ચત્વારો ધર્માદયઃ । તત્ર જ્ઞાનાખ્યેન ભાવેનાન્ધે તમસિ
વર્તમાનં જગત્ દૃષ્ટવતો મુનેઃ કરુણોત્પન્ના । તયા ચ પ્રેર્યમાણ
આસુરિં સગોત્રબ્રાહ્મણં વર્ષસહસ્રયાતિનમાગત્યોવાચ । 'આસુરે રમસે
ત્વં ગૃહસ્થધર્મેણ' ઇતિ । સ તમાહ- 'ભગવન્ ન રમેઽહમ્' ઇતિ ।
પુનર્વર્ષસહસ્રે પૂર્ણે તં ગત્વા તથોવાચ । સોઽપિ 'ભગવન્ ન
રમેઽહમ્' ઇત્યુવાચ । તતો મુનિના 'યદિ વિરક્તસ્ત્વમ્, એહિ બ્રહ્મચર્યં
ચર' ઇત્યસાવુક્તઃ । સ તુ પ્રદિપદ્ય ગૃહસ્થધર્મં ત્યક્ત્વા પ્રવ્રજિતઃ ।
તસ્મૈ શિષ્યાયાનુકમ્પયા સંક્ષિપ્ય દત્તવાન્ । 'તમ એવ ખલ્વિદમાસીત્' ।
તસ્મિંસ્તમસિ ક્ષેત્રજ્ઞ એવ પ્રથમઃ । તમઃ પ્રધાનમ્, ક્ષેત્રજ્ઞઃ પુરુષ
ઉચ્યતે । આસુરિરપિ તદેવ સંક્ષિપ્તં પઞ્ચશિખાય સ્વશિષ્યાયાનુકમ્પયા
પ્રદદૌ ॥

'તેન' ઇતિ । પઞ્ચશિખેન મુનિના બહુધા કૃતં તન્ત્રમ્ ।
ષષ્ટિતન્ત્રાખ્યં ષષ્ટિખણ્ડં કૃતમિતિ । તત્રૈવ હિ ષષ્ટિરર્થા
વ્યાખ્યાતાઃ ॥ ૭૦॥

કારિકા ૭૧

નનુ ચ ષષ્ટિતન્ત્રમેવાસ્તુ કિં સપ્તત્યેતિ સ્વશાસ્ત્રકરણપ્રયોજનમાહ-
॥ શિષ્યપરમ્પરયાઽઽગતમીશ્વરકૃષ્ણેન ચૈતદાર્યાભિઃ ।
સંક્ષિપ્યાર્યમતિના સમ્યગ્વિજ્ઞાય સિદ્ધાન્તમ્ ॥ ૭૧ ॥ ॥

'શિષ્યપરમ્પરયા' ઇત્યાદિ । મુનેરાસુરેઃ પઞ્ચશિખસ્તથા
ગર્ગગૌતમપ્રભૃતિર્ણરામતંગ્રમ્યા (?) ઈશ્વરકૃષ્ણનામાનં
પરિવ્રાજકમિત્યનયા શિષ્યપરમ્પરયા । ઇતિ જ્ઞાનમયરૂપેણાગતં
સિદ્ધાન્તં ષષ્ટિતન્ત્રમ્ । સમ્યગ્વિજ્ઞાય સંક્ષિપ્તં ષષ્ટિતન્ત્રમ્,
પઞ્ચવિંશતિતત્ત્વાખ્યં જ્ઞાનમિત્યર્થઃ ॥

આર્યમતિઃ, અધિગતતત્ત્વજ્ઞાનતયાર્યમતિઃ ॥

'આર્યાભિઃ' ઇતિ । સપ્તત્યેત્યર્થઃ । 'દુઃખત્રયાભિઘાતાત્' 'એતત્ પવિત્રમ્'
ઇતિ સપ્તત્યાભિહિતમ્ ॥ ૭૧॥

કારિકા ૭૨

અત્ર ષષ્ટિતન્ત્રે બહવોઽર્થાઃ, તેઽત્ર નોક્તા ઇત્યાહ-
॥ સપ્તત્યાં કિલ યેઽરથાસ્તેઽર્થાઃ કૃત્સ્નસ્ય ષષ્ટિતન્ત્રસ્ય ।
આખ્યાયિકાવિરહિતાઃ પરવાદવિવર્જિતાશ્ચાપિ ॥ ૭૨॥

'સપ્તત્યામ્' ઇત્યાદિ । 'એષ પ્રત્યયસર્ગો વિપર્યયાશક્તિતુષ્ટિસિદ્ધ્યાખ્યઃ'
ઇત્યાદિના ગ્રન્થેન ય ઉક્તાસ્તે કૃત્સ્નસ્ય ષષ્ટિતન્ત્રસ્યાપિ ॥

કિન્તુ 'આખ્યાયિકાવિરહિતાઃ પરવાદવિવર્જિતાઃ શુદ્ધાઃ' ઇતિ । આખ્યાયિકા
આખ્યાનમ્, તદ્વિરહિતાઃ । પરચોદ્યં તેન વિવર્જિતાઃ । શુદ્ધાઃ કેવલાઃ । પરં
બન્ધમોક્ષોપયોગિનોઽર્થાઃ દર્શિતા ઇતિ તસ્માત્ સમ્પૂર્ણેયં સપ્તતિરિતિ ॥ ૭૨॥

॥ ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યશ્રીગોવિન્દભગવત્પૂજ્યપાદશિષ્યેણ
શ્રીશઙ્કરભગવતા કૃતા સાંખ્યસપ્તતિટીકા સમાપ્તા ॥

Encoded and proofread by Dhaval Patel drdhaval2785 at gmail.com

*sAMkhyasaptatiTIkA jayama NgalA*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*